१६३४

सारस्वत व्याकरण

श्रीलक्ष्मीधर - विद्यामन्दिर.
देवप्रयाग (गढ़वाल-हिमालय)
व्यवस्थापक- पं. चक्रधरजोशी

नामि ॥ १७ ॥

नामि परे पूर्वस्य दीर्घो भवति । देवानाम्[1] । सप्तम्येकवचने देव ङि इति स्थिते " अइ ए " । देवे । देवयोः । पूर्ववत् । सप्तमीबहुवचने देव सुप् इति स्थिते पकारस्येत्संज्ञायां लोपः । एस्भि बहुत्वे ॥ १७ ॥

क्विलात्[2] षः सः कृतस्य[3] ॥ १८ ॥

कवर्गादिलाच्च प्रत्याहारादुत्तरस्य केनचित् सूत्रेण कृतस्य सकारस्य षकारादेशो भवति । देवेषु ॥ १८ ॥

आमन्त्रणे सिर्द्धिः ॥ १९ ॥

आमन्त्रणमभिमुखीकरणं तस्मिन्नर्थे विहितःसिर्द्धिसंज्ञको भवति॥१९॥

समानाद्धेर्लोपोऽधातोः ॥ २० ॥

समानादुत्तरस्य धेर्लोपो भवत्यधातोः (आभिमुख्याभिव्यक्तये हेशब्दस्य प्राक् प्रयोगः ॥ * ॥) हे देव । हे देवौ । हे देवाः । एवं घट-पटस्तम्भकुम्भादयोऽप्यकारान्ताः पुँल्लिङ्गाः ॥ अकारान्तानामपि सर्वा-दीनां तु विशेषः ॥ सर्व विश्व उभ उभय अन्य अन्यतर इतर डतर डतम कतरकतम सम सिम नेम एक पूर्व पर अवर दक्षिण उत्तर अपर अधर स्व अन्तर त्यद् तद् यद् एतद् इदम् अदस् द्वि किम् युष्मद् अस्मद् भवतु एते सर्वादयस्त्रिलिंगाः । तत्र पुंलिङ्गत्वेन रूपं ज्ञेयम् ॥ २० ॥

---

१ नुम्सहिते आमि तु दीर्घो न भवति । यदि हि नुम् सहिते आम्यपि दीर्घः स्यात्तर्हि नुमं बाधित्वा नुड्विधानं व्यर्थं स्यात् ॥ २ क्विलात् किम् देवस्य । ३ कृतस्य इति किम् सुपीः सुपिसौ सुपिसः ॥

जसी ॥ २१ ॥

सर्वादेरकारान्तात्परो जस ई भवति । सर्वः । सर्वौ । सर्वे ॥ सर्वम् । सर्वौ । सर्वान् ॥ २१ ॥

षऋर्नो णोऽनन्ते ॥ २२ ॥

षकाररेफऋवर्णेभ्यः परस्य नकारस्य णकारादेशो भवति । अन्ते स्थितस्य न भवति । सर्वानित्यादि ॥ २२ ॥

अव कुप्वन्तरेऽपि ॥ २३ ॥

अवप्रत्याहारेण कवर्गेण पवर्गेण च मध्ये व्यवधानेऽपि नस्य णो भवति नान्येन । सर्वेण सर्वाभ्याम् सर्वैः । चतुर्थ्येकवचने सर्व ङे इति स्थिते ॥ २३ ॥

सर्वादेः स्मट् ॥ २४ ॥

सर्वादेरकारान्तात्परस्य चतुर्थ्येकवचनस्य स्मडागमो भवति । सर्वस्मै । सर्वाभ्याम् । सर्वेभ्यः । पञ्चम्येकवचने सर्व ङसि इति स्थिते ॥ २४ ॥

अतः ॥ २५ ॥

सर्वादेः अकारान्तात्परस्यातः स्मडागमो भवति । सर्वस्मात् । सर्वाभ्याम् । सर्वेभ्यः । सर्वस्य । सर्वयोः ॥ २५ ॥

सुडामः ॥ २६ ॥

सर्वादेः परस्यामः सुडागमो भवति । सर्वेषाम् ॥ २६ ॥ सप्तम्येकवचने सर्व ङि इति स्थिते ।

---

१ आङ्गिः इत्यनेन आत्वम् । २ एत्वषत्वे ॥

ङि स्मिन् ॥ २७ ॥

सर्वादेरकारान्तात्परो ङि स्मिन् भवति । सर्वस्मिन् सर्वयोः । सर्वेषु ॥ एवं विश्वादीनामेकशब्दपर्यन्तानां रूपं ज्ञेयम् । डतरडतमौ विहाय तौ प्रत्ययौ ततस्तदंताः शब्दग्राह्याः।* पूर्वादीनां तु नवानां जसि ईकारो वा वक्तव्यः ॥* पूर्वे पूर्वाः । परे पराः । इत्यादि ॥ ङसिङ्योः स्मात्स्मिनौ वा वक्तव्यौ ॥ * पूर्वस्मात् पूर्वात् । पूर्वस्मिन् पूर्वे इत्यादि । प्रथमचरमतयायडल्पार्द्धकतिपयनेमानां जसीकारो वा वक्तव्यः ॥ * ॥ प्रथमे प्रथमाः । चरमे चरमाः । शेषं देववत् ॥ तयायडौ प्रत्ययौ ॥ तीयस्य सर्वशब्दवद्रूपं ङित्सु वा वक्तव्यम् ॥ * ॥ द्वितीयस्मै । द्वितीयाय । द्वितीयस्मात् । द्वितीयात् । द्वितीयस्मिन् द्वितीये । एवं तृतीयः । उभशब्दो नित्यं द्विवचनान्तः । उभौ । उभौ । उभाभ्याम् । उभाभ्याम् । उभाभ्याम् । उभयोः । उभयोः । उभयशब्दस्य द्विवचनाभावादेकवचनबहुवचने भवतः । उभयः । उभये । उभयम् । उभयान् । उभयेन । उभयैः । उभयस्मै । उभयेभ्यः । इत्यादि ॥ २७ ॥ अकारान्तः पुँल्लिङ्गो मासशब्दः ॥

मासस्यालोपो वा ॥ २८ ॥

मासशब्दस्याकारस्य लोपो वा भवति सर्वासु विभक्तिषु परतः॥२८॥

हसेपः सेर्लोपः ॥ २९ ॥

हसान्तादीबन्ताच्च परस्य सेर्लोपो भवति । माः मासः मासौ मासौ मासः मासाः । मासम् मासम् मासौ मासौ मासः मासान् । मासा मासेन माभ्याम् मासाभ्याम् माभिः मासैः । मासे मासाय

माभ्याम् मासाभ्याम् माभ्यः मासेभ्यः । मासः मासात् माभ्याम् मासाभ्याम् माभ्यः मासेभ्यः । मासः मासस्य मासोः मासयोः मासाम् मासानाम् । मासि मासे मासोः मासयोः मास्सु मासेषु । हे माः हे मासः हे मासौ हे मासौ हे मासः हे मासाः । आकारान्तः पुँल्लिंगः सोमपाशब्दः । सोमपाः सोमपौ सोमपाः । अधातोरिति विशेषणाद्धे-र्लोपो नास्ति । हे सोमपाः । सोमपाम् सोमपौ । द्वितीयाबहुवचने सोमपा अस् इति स्थिते ॥ २९ ॥

आतो धातोर्लोपः ॥ ३८ ॥

धातुसम्बन्धिन आकारस्य लोपो भवति शसादौ स्वरे परे । सोमपः । सोमपा सोमपाभ्याम् सोमपाभिः । सोमपे सोमपाभ्याम् सोमपाभ्यः । सोमपः सोमपाभ्याम् सोमपाभ्यः । सोमपः सोमपोः सोमपाम् । सोमपि सोमपोः सोमपासु । एवं कीलालपाशंखध्माप्रभृतयः ॥ ३० ॥

इकारान्तः पुँलिङ्गो हरिशब्दः । प्रथमैकवचने हरिः ॥

औयू ॥ ३१ ॥

इकारान्तादुकारान्ताच्च पर औकारौ यू आपद्यते । ईऊ भवतः । हरी ॥ ३१ ॥

एओजसि ॥ ३२ ॥

इकारान्तस्य उकारान्तस्य च जसि परे एकार ओकारश्च भवति । हरयः ॥ ३२ ॥

---

१ सोमं पिबतीति सोमपाः । २ धातोः किम् । हाहान् । ३ इदुद्भ्यामिति किम् । देवौ ।

धौ ॥ ३३ ॥

इकारान्तस्य उकारान्तस्य च धिविषये एकार ओकारश्च भवति । हे हरे हे हरी हे हरयः । हरिम् हरी हरीन् ॥ ३३ ॥

टानास्त्रियाम् ॥ ३४ ॥

ईकारान्तादुकारान्ताच्च परष्टा ना भवत्यस्त्रियाम् । हरिणा हरिभ्याम् हरिभिः ॥ ३४ ॥

ङिति ॥ ३५ ॥

इकारान्तस्य उकारान्तस्य च ङिति परे एकार ओकारश्च भवति । हरये हरिभ्याम् हरिभ्यः ॥ ३५ ॥

ङसिङसोरस्य ॥ ३६ ॥

एदोद्भ्यां परस्य ङसिङसोरकारस्य लोपो भवति । हरेः हरिभ्याम् हरिभ्यः । हरेः हर्योः हरीणाम् ॥ ३६ ॥ हरि ङि इति स्थिते ।

ङेरौ ङित् ॥ ३७ ॥

इदुद्भ्यामुत्तरस्य ङेरौ भवति स च ङित् ॥ ३७ ॥

ङिति ॥ ३८ ॥

ङिति परे टेर्लोपो भवति । हरौ हर्योः हरिषु । एवमग्निगिरिरविकविप्रभृतयः एतैरेव सूत्रैः सिध्यन्ति । एवं उकारान्ताश्च विष्णुवायुभानुप्रभृतयः । भानुः[2] भानू भानवः । भानुम् भानू भानून् ।

---

१ इदुद्भ्यां किम् गवा ॥ २ भातीति भानुः सूर्यः ।

भानुना भानुभ्याम् भानुभिः । भानवे भानुभ्याम् भानुभ्यः । भानोः भानुभ्याम् भानुभ्यः । भानोः भान्वोः भानूनाम् । भानौ भान्वोः भानुषु । हे भानो इत्यादि ॥ ३८ ॥ सखिशब्दस्य भेदः ॥

सेर्डाधेः ॥ ३९ ॥

सखिशब्दात्परस्य सेरधेः डा भवति स च डित् । डित्वाट्टिलोपः । सखा । अधेरिति विशेषणादेकारो धिविषये । हे सखे ॥ ३९ ॥

ऐसख्युः ॥ ४० ॥

सखिशब्दस्यैकारो भवति धिवर्जितेषु पञ्चसु परेषु । षष्ठीनिर्दिष्टस्यादेशस्तदन्तस्य ज्ञेयः ॥ ४१ ॥

द्विवचनस्यावा छन्दसि ॥ ४२ ॥

द्विवचनस्य औकारश्छन्दस्याकारमापद्यते । सखायौ सखायः सखायम् सखायौ सखीन् ॥ ४१ ॥

सखिंपत्योरीक् ॥ ४२ ॥

सखिपतिशब्दयोरीगागमो भवति टाङेङिषु परतः । दीर्घत्वान्न ना भवति । सख्या "आगमजमनित्यम्" । सखिना सखिभ्याम् सखिभिः सख्ये सखिभ्याम् सखिभ्यः । सखि ङसि इति स्थिते ॥ ४२ ॥

ऋङ्ङे ॥ ४३ ॥

सखिपतिशब्दयोर्ऋगागमो भवति ङसि ङसोरकारे स च डित् । सख्यृ अस् इति जाते ॥ ४३ ॥

---

१ सखिपत्यौ विशेषस्य विवक्षणात् तदन्तविधिर्न । तेनातिसखिना भूपतिना इत्यत्र नेक् ।

ऋतोङ् उः ॥ ४४ ॥

ऋकारान्तात्परस्य ङसिङसोरकारस्य उकारो भवति । सख्युः सखिभ्याम् सखिभ्यः । सख्युः सख्योः सखीनाम् । सप्तम्येकवचने सखि (ई) इ इति जाते सख्योः सखिषु । पतिशब्दस्य प्रथमाद्वितीययोर्हरिशब्दवत्प्रक्रिया । तृतीयादौ तु सखिशब्दवत्प्रक्रिया । (पतिरसमास एव सखिवद्वक्तव्यः *) ततः समासान्तस्य नादयो भवन्ति । प्रजापतिना प्रजापतये इत्यादि ॥ ४४ ॥

द्विशब्दो नित्यं द्विवचनान्तः । द्वि औ इति स्थिते ॥

त्यदादेष्टेरः स्यादौ ॥ ४५ ॥

त्यदादेष्टेरकारो भवति स्यादौ परे । द्वौ । द्वौ । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः ॥ त्यदादीनां धेरभावः । त्रिशब्दो नित्यं बहुवचनान्तः । त्रि जस् इति स्थिते । ए ओ जसि इत्यनेन एकारे कृते अयादेशः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः ॥ ४५ ॥

त्रेरयङ्[1] ॥ ४६ ॥

त्रिशब्दस्यायङादेशो भवति नामि परे । ङिदन्तस्य वक्तव्यः * । त्रयाणाम् त्रिषु ॥ कतिशब्दो नित्यं बहुवचनान्तः । कति जस् इति स्थिते (कतिशब्दाज्जश्शसोर्लुग्वक्तव्यः *) इतिजश्शसोर्लुक् ॥ लुकि न तन्निमित्तम् । कतिषु । त्रिषु लिंगेषु चायं सरूपः[2] ॥ ४६ ॥

---

१ त्रेरिति एकवचननिर्देशस्तु अनुकरणत्वात् । २ समानरूपमस्य इति ।

ईकरान्तः पुँल्लिंगः सुश्रीशब्दः[1]। सुश्रीः। सुश्री औ इति स्थिते।

य्वोर्धातोरियुवौ स्वरे ॥ ४७ ॥

धातोरीकारोकारयोरियुवौ भवतः स्वरे परे। सुश्रियौ सुश्रियः। हे सुश्रीः हे सुश्रियौ हे सुश्रियः। सुश्रियम् सुश्रियौ सुश्रियः। सुश्रिया सुश्रीभ्याम् सुश्रीभिः। सुश्रिये सुश्रीभ्याम् सुश्रीभ्यः। सुश्रियः सुश्रीभ्याम् सुश्रीभ्यः। सुश्रियः सुश्रियोः सुश्रियाम्। सुश्रियि सुश्रियोः सुश्रीषु ॥ तथैव सुधीशब्दः[2]। उकारान्तः पुँल्लिंगः स्वयम्भूशब्दः[3]। स्वयंभूः स्वयंभुवौ स्वयंभुवः। स्वयंभुवम् स्वयंभुवौ स्वयंभुवः। स्वयंभुवा स्वयंभूभ्याम् स्वयंभूभिः। स्वयंभुवे स्वयंभूभ्याम् स्वयंभूभ्यः। स्वयंभुवः स्वयंभूभ्याम् स्वयंभूभ्यः। स्वयंभुवः स्वयंभुवोः स्वयंभुवाम्। स्वयंभुवि स्वयंभुवोः स्वयंभूषु ॥ ४७ ॥

सेनानीशब्दस्याविशेषो हसादौ। स्वरादौ तु विशेषः। सेनानीः[4]। सेनानी औ इति स्थिते।

य्वौ वा ॥ ४८ ॥

धातोरवयवसंयोगः पूर्वो यस्मादीकारादूकारान्तान्नास्ति तदन्तस्यानेकस्वरस्य कारकाव्ययपूर्वस्यैकस्वरस्य च धातोरीकारस्य ऊकारस्य च यकारवकारौ भवतः स्वरे परे। वर्षाभपुनर्भूव्यतिरिक्तभूशब्दसुधीशब्दौ वर्जयित्वा। वाग्रहणादियं विवक्षा। सेनान्यौ सेनान्यः। हे सेनानीः हे

---

१ सुष्टु श्रीर्यस्य इति सुश्रीः। २ सुष्टु ध्यायतीति सुधीः। ३ स्वयं भवतीति स्वयंभूः। ४ सेनां नयतीति सेनानीः गुहः।

सेनान्यौ हे सेनान्यः । सेनान्यम् सेनान्यौ सेनान्यः । सेनान्या सेनानीभ्याम् सेनानीभिः । सेनान्ये । सेनानीभ्याम् सेनानीभ्यः । सेनान्यः सेनानीभ्याम् सेनानीभ्यः । सेनान्यः सेनान्योः सेनान्यादीनां वामो नुट् वक्तव्यः ॥ * ॥ सेनान्याम् सेनानीनाम् ॥ ४८ ॥

आम् ङेः ॥ ४९ ॥

आबन्तादीबन्तान्नीशब्दाच्चोत्तरस्य ङेरामादेशो भवति । सेनान्याम् सेनान्योः सेनानीषु । वातप्रमीशब्दस्य भेदः । वातप्रमीः वातप्रम्यौ वातप्रम्यः । हे वातप्रमीः हे वातप्रम्यौ हे वातप्राम्यः । वातप्रमीम् वातप्रम्यौ वातप्रमीन् । वातप्रम्या वातप्रमीभ्याम् वातप्रमीभिः । वातप्रम्ये वातप्रमीभ्याम् वातप्रमीभ्यः । वातप्रम्यः वातप्रमीभ्याम् वातप्रमभ्यः । वातप्रम्यः वातप्रम्योः वातप्रम्याम् । ङौ तु सवर्णदीर्घः । वातप्रमी वातप्रम्योः वातप्रमीषु । एवं ग्रामणीप्रभृतयः सेनानीवत् । ऊकारान्ताश्च यवलू[3] प्रभृतयः ॥ ४९ ॥

ऋकारान्तः पुँल्लिंगः पितृशब्दः ।

सेरा ॥ ५० ॥

ऋकारान्तात्परस्य सेरा भवति स च डित् । डित्त्वाट्टेर्लोपः । पिता५०

अर् पञ्चसु ॥ ५१ ॥

ऋकारोऽर्भवति पञ्चसु परेषु । पितरौ । पितरः ॥ ५१ ॥

---

१ वातं प्रमिमीते इतिवातप्रमीः । २ अमि वातप्रमीमाहुः शासि वातप्रमीनिति ॥ ङौ तु वातप्रमी ज्ञेया शेषं ग्रामणीवद्विदुः । ३ यवान् लुनातीति यवलूः ।

धेरर् ॥ ५२ ॥

ऋकारान्तात्परस्य धेरर् भवति स च डित् । हे पितः हे पितरौ हे पितरः । पितरम् पितरौ पितॄन् । पित्रा पितृभ्याम् पितृभिः । पित्रे पितृभ्याम् पितृभ्यः । पितुः पितृभ्याम् पितृभ्यः । पितुः पित्रोः पितॄणाम् ॥ ५२ ॥

ङौ ॥ ५३ ॥

ऋकारस्यार्भवति ङौ परे । पितरि पित्रोः पितृषु । एवं जामातृभ्रात्रादयः । नृशब्दः । ना नरौ नरः । नरम् नरौ नॄन् । न्रा नृभ्याम् नृभिः । न्रे नृभ्याम् नृभ्यः । नुः नृभ्याम् नृभ्यः । नुः न्रोः ॥ ५३ ॥

नुर्वा नामि दीर्घः ॥ ५४ ॥

नृशब्दस्य नामि परे वा दीर्घो भवति । नृणाम् नॄणाम् । नरि न्रोः नृषु । हे नः हे नरौ हे नरः ॥ ५४ ॥ कर्तृशब्दस्य पञ्चसु विशेषः ।

स्तुरार् ॥ ५५ ॥

सकारतृप्रत्ययसम्बधिन ऋकारस्यार्भवति पञ्चसु परेषु । कर्तृ सि इति स्थिते । यदादेशस्तद्वद्भवति । सेरा ॥ डित्त्वाट्टेर्लोपः । कर्ता कर्तारौ कर्तारः । हे कर्तः हे कर्तारौ हे कर्तारः ॥ कर्तारम् कर्तारौ कर्तॄन् । कर्त्रा कर्तृभ्याम् कर्तृभिः । कर्त्रे कर्तृभ्याम् कर्तृभ्यः । कर्तुः कर्तृभ्याम् कर्तृभ्यः । कर्तुः कर्त्रोः कर्तॄणाम् । कर्तरि कर्त्रोः कर्तृषु । एवं नप्तृहो-

---

१ स्वसा नप्ता च नेष्टा च त्वष्टा कर्ता तथैव च ॥ होता पोता प्रशास्ता च हृष्टौ स्वस्रादयः स्मृताः ॥ १ ॥

तृप्रशास्तृप्रभृतयः। उकारान्तस्य क्रोष्टुशब्दस्य भेदः (उकारान्तस्यापि क्रोष्टुशब्दस्य पञ्चस्वधिषु तृप्रत्ययान्तस्येव रूपं वक्तव्यम् ॥ * ॥ क्रोष्टा क्रोष्टारौ क्रोष्टारः। क्रोष्टारम् क्रोष्टारौ। शसि परे तृप्रत्यवद्भावाभावात् क्रोष्टून्। तृतीयादौ स्वरादौ तृप्रत्ययान्तता वा वक्तव्या ॥ * ॥ क्रोष्ट्रा क्रोष्टुना क्रोष्टुभ्याम् क्रोष्टुभिः। क्रोष्ट्रे क्रोष्टवे क्रोष्टुभ्याम् क्रोष्टुभ्यः। क्रोष्टुः क्रोष्टोः क्रोष्टुभ्याम् क्रोष्टुभ्यः। क्रोष्टुः क्रोष्टोः क्रोष्ट्रोः क्रोष्ट्वोः क्रोष्टूनाम्। नुडागमे कृते हसादित्वात्तृज्वद्भावो नास्ति। कृताकृतप्रसङ्गी यो विधिः स नित्यः। नित्यानित्ययोर्मध्ये नित्यविधिर्बलवान्। क्रोष्टरि क्रोष्टौ क्रोष्ट्रोः क्रोष्ट्वोः क्रोष्टुषु। ॠकारान्ता ऌकारान्ता एकारान्ताश्चाप्रसिद्धाः ॥ ५५ ॥

रैस्भि ॥ ५६ ॥

रैशब्दस्याकारादेशो भवति सकारभकारादौ विभक्तौ परतः। सुराः स्वरादौ[1] सर्वत्रायादेशः। सुरायौ सुरायः। हे सुराः हे सुरायौ हे सुरायः। सुरायम्। सुरायौ सुरायः। सुराया सुराभ्याम् सुराभिरित्यादि ॥ ५६ ॥

ओकारान्तः पुँल्लिङ्गो गोशब्दः।

ओरौ ॥ ५७ ॥

ओकारस्यौकारादेशो भवति पञ्चसु परेषु। गौः गावौ गावः। हे गौः हे गावौ हे गावः ॥ ५७ ॥

अम्शसि ॥ ५८ ॥

ओकारस्यात्वं भवति अमि शसि च परे। गाम् गावौ गाः। गवा

---

१ स्वरादौ सर्वत्र ऐ आय् इत्यनेनायादेशः।

गोभ्याम् गोभिः । गवे गोभ्याम् गोभ्यः । ङस्येत्यकारलोपः । गोः गोभ्याम् गोभ्यः । गोः गवोः गवाम् । गवि गवोः गोषु । एवं सुद्यो[1]-शब्दः ग्लौशब्दस्य हसादावविशेषः स्वरादावावादेशः ग्लौः ग्लावौ ग्लावः । ग्लावम् ग्लावौ ग्लावः । ग्लावा ग्लौभ्यामित्यादि ॥ ९८ ॥

॥ इति स्वरान्ताः पुँल्लिङ्गाः ॥

॥ अथ स्वरान्ताः स्त्रीलिङ्गाः प्रदर्श्यन्ते ॥

तत्राबन्तो गङ्गाशब्दः ।

आबतः स्त्रियाम् ॥ १ ॥

अकारान्तान्नाम्नः स्त्रियां वर्तमानादाप्प्रत्ययो भवति ॥ १ ॥

आपः ॥ २ ॥

आबन्तात्परस्य सेर्लोपो भवति । गङ्गा ॥ २ ॥

औरि ॥ ३ ॥

आबन्तात्पर औ ईकारमापद्यते । "अ इ ए" गङ्गे गङ्गाः ॥ ३ ॥

धिरिः ॥ ४ ॥

आबन्तात्परो धिरिर्भवति । हे गङ्गे ॥ ४ ॥

अम्बादीनां धौ ह्रस्वः ॥ ५ ॥

अम्बादीनां धौ परे ह्रस्वो भवति । हे अम्ब हे अक्क हे अल्ल (असंयुक्तानां डलकवतीनां प्रतिषेधो वाच्यः * । हे अम्बाडे हे

---

१ सुष्ठु द्यौः यस्मिन् स सुद्यौः ।

अम्बाले हे अम्बिके इत्यादौ ह्रस्वो न भवति । गङ्गाम् गङ्गे गङ्गाः ॥ ५ ॥

टौसोरे ॥ ६ ॥

आबन्तस्य टौसोः परयोरेत्वं भवति । अयादेशः । गङ्गया गङ्गाभ्याम् गङ्गाभिः ॥ ६ ॥

ङितां यट् ॥ ७ ॥

आबन्तात्परेषां ङे ङसि ङस् ङि इत्येतेषां ङितां वचनानां यडागमो भवति । टकारः स्थाननियमार्थः । गङ्गायै गङ्गाभ्याम् गङ्गाभ्यः । गङ्गायाः गङ्गाभ्याम् गङ्गाभ्यः । गङ्गायाः गङ्गयोः (आबन्तादीबन्तादामो नुट् वक्तव्यः ॥ * ॥ गङ्गानाम् । ओम् ङेः । गङ्गायाम्[1] गङ्गयोः गङ्गासु । एवं श्रद्धामेधाशालामालाहेलादोलाप्रभृतयः । सर्वादीनां तु ङित्सु विशेषः ॥ ७ ॥

यटोऽच्च ॥ ८ ॥

आबन्तात्सर्वादेः परस्य यटः सुडागमो भवति पूर्वस्य चापोऽकारो भवति । सर्वस्यै सर्वाभ्याम् सर्वाभ्यः । सर्वस्याः सर्वाभ्याम् सर्वाभ्यः । सर्वस्याः सर्वयोः सर्वासाम् । सर्वस्याम् सर्वयोः सर्वासु । आकारान्तो जराशब्दः । (जरायाः स्वरादौ जरस् वा वक्तव्यः* ॥ जरा जरसौ जरे जरसः जराः । जरसम् जराम् जरसौ जरे जरसः जराः ।

---

१ ननु गङ्गायामित्यादौ ङेरामादेशे कृते नुडमाः इत्यनेन शास्त्रेण नुट् स्यादिति चेन्न । परत्वात् ङितां यट् इति यटा बाधनात् ॥

जरसा जरया जराभ्याम् जराभिः । जरसे जरायै जराभ्याम् जराभ्यः । जरसः जरायाः जराभ्याम् जराभ्यः । जरसः जरायाः जरसोः जरयोः जरसाम् जराणाम् । जरसि जरायाम् जरसोः जरयोः जरासु । हे जरे हे जरसौ हे जरे हे जरसः हे जराः । इकारान्तः स्त्रीलिङ्गो बुद्धिशब्दः । तस्य च प्रथमाद्वितीययोः हरिशब्दवत् प्रक्रिया । बुद्धिः बुद्धी बुद्धयः । बुद्धिम् बुद्धी बुद्धीः । स्त्रीत्वाच्छसो नत्वाभावः । बुद्ध्या बुद्धिभ्याम् बुद्धिभिः ॥ ८ ॥

इदुद्भ्याम् ॥ ९ ॥

स्त्रियां वर्तमानाभ्यामिकारोकाराभ्यां परेषां ङित्तां वचनानां वा अडागमो भवति । बुद्ध्यै बुद्धये बुद्धिभ्याम् बुद्धिभ्यः । बुद्ध्याः बुद्धेः बुद्धिभ्याम् बुद्धिभ्यः । बुद्ध्याः बुद्धेः बुद्ध्योः बुद्धीनाम् ॥ ९ ॥

स्त्रिया य्वोः ॥ १० ॥

इश्च उश्च यू तस्मात् इवर्णान्तादुवर्णान्ताच्च परस्य ङेरामादेशो भवति । बुद्ध्याम् अडागमाभावे आमोऽप्यभावः । बुद्धौ बुद्ध्योः बुद्धिषु । एवं मति भूति विभूति धृति रुचि कृति सिद्धि शान्ति क्षान्ति भ्रान्त्यालिशक्तिप्रभृतयः । एवं धेनु तनु रज्जुप्रभृतयः स्त्रीलिङ्गाः । धेनुः धेनू धेनवः । धेनुम् धेनू धेनूः । धेन्वा धेनुभ्याम् धेनुभिः । धेन्वै धेनवे धेनु-

---

१ तपरत्वं किम् नद्यै ॥ २ ङौतु आडामोः सहैव प्रवृत्त्यप्रवृत्ती । एकयोगीनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः इति न्यायात् ।

भ्याम् धेनुभ्यः । धेन्वाः धेनोः धेनुभ्याम् धेनुभ्यः । धैन्वाः धेनोः से- न्वोः धेनूनाम् । धन्वां धेनौ धेन्वोः धेनुषु ॥ १० ॥

ईकारान्तः स्त्रीलिंगो नदीशब्दः ।

हसेपः सेर्लोपः ॥ ११ ॥

हसान्तादीबन्ताच्च परस्य सेर्लोपो भवति । नदी नद्यौ नद्यः ॥ ११ ॥

धौ ह्रस्वः ॥ १२ ॥

इवर्णोनयोरधातोः स्त्रियां धौ परे ह्रस्वो भवति । हे नदि हे नद्यौ हे नद्यः । नदीम् नद्यौ नदीः । नद्या नदीभ्याम् नदीभिः ॥ १२ ॥

ङितामट् ॥ १४ ॥

स्त्रियां वर्तमानादीकारान्तादूकारान्ताच्च परेषां ङितां वचनानामडा- गमो भवति ॥ नद्यै नदीभ्याम् नदीभ्यः नद्याः नदीभ्याम् नदीभ्यः । नद्याः नद्योः नदीनाम् । नद्याम् नद्योः नदीषु । एवं गौरीसरस्वतीब्र- ह्माणीकुमारीकिशोरीकलभीपार्वतीभवानीप्रभृतयः॥ लक्ष्मीशब्दस्येबन्तत्वा- भावात् सेर्लोपो नास्ति । लक्ष्मीः लक्ष्म्यौ लक्ष्म्यः । शेषं नदीवत् । हे लक्ष्मि । स्त्रीशब्दस्य ईबन्तत्वात्सेर्लोपोस्ति । स्त्री ॥ १३ ॥

स्त्रीभ्रुवोः ॥ १४ ॥

स्त्रीशब्दस्य भ्रूशब्दस्य च इयुवौ भवतः स्वरे परे । स्त्रियौ स्त्रियः । हे स्त्रि हे स्त्रियौ हे स्त्रियः ॥ १४ ॥

---

१ अवीलक्ष्मीतरीतन्त्रीधीह्रीश्रीणामुदाहृतः ॥ सप्तानामेव शब्दानां सिलोपो न कदाचन ॥

वाऽम्शसि ॥ १५ ॥

स्त्रीशब्दस्य अमि शसि च परे वा इयादेशो भवति । स्त्रियम् स्त्रीम् स्त्रियौ स्त्रीः स्त्रियः । स्त्रिया स्त्रीभ्याम् स्त्रीभिः । स्त्रीषु । शेषं नदीवत् । श्रीः श्रियौः श्रियः । श्रियम् श्रियौ श्रियः।श्रिया श्रीभ्याम् श्रीभिः॥१५॥

वेयुवः ॥ १६ ॥

इयुवन्तात् स्त्रियां वर्तमानात्परेषां ङितां वचनानां वाडागमो भवति स्त्रियास्तु नित्यम् । श्रियै श्रिये श्रीभ्याम् श्रीभ्यः । श्रियः श्रियाः श्रीभ्याम् श्रीभ्यः । श्रियः श्रियाः श्रियोः । (श्रियादीनां वामो नुड्वक्तव्यः ॥ * ॥ श्रियाम् श्रीणाम् । ङौ परेऽडागमाभावे अमोप्यभावः । श्रियाम् श्रियि श्रियोः श्रीषु । हे श्रीः । एवं ह्रीधीप्रभृतयोप्यनीवन्ताः । एवं भूशब्दो भ्रूशब्दवत् । वधूजम्ब्वादीनां नदीशब्दवत् । वधूः वध्वौ वध्वः । वधूम् वध्वौ वधूः । जम्बूः जम्ब्वौ जम्ब्वः । हे जम्बु हे जम्ब्वौ हे जम्ब्वः । ऋकारान्तो मातृशब्दः माता मातरौ मातरः । मातरम् मातरौ मातॄः । शसीति दीर्घत्वम् शेषं । पितृवत् । रैशब्दः सुरैशब्दवत् । नौशब्दो ग्लौशब्दवत् । गोशब्दस्तु पूर्ववत् ॥ १६ ॥

॥ इति स्वरान्ताः स्त्रीलिंगाः ॥

॥ अथ स्वरान्ता नपुंसकलिङ्गाः प्रदर्श्यन्ते ॥

अकारान्तो नपुंसकः कुलशब्दः । तस्य प्रथमाद्वितीयैकवचने ।

अतोऽम् ॥ १ ॥

अकारान्तान्नपुंसकलिङ्गात्परयोः स्यमोरम् भवति अधौ । अतोऽम्-ग्रहणं लुग्व्यावृत्त्यर्थम् । अम्शसोरस्य । कुलम् ॥ १ ॥

ईमौ ॥ २ ॥

नपुंसकलिङ्गात्पर औ ईकारमापद्यते । कुले ॥ २ ॥

जश्शसोः शिः ॥ ३ ॥

नपुंसकलिंगात्परयोर्जश्शसोः शिर्भवति । शकारः सर्वादेशार्थः ॥ ३ ॥

गुरुः शिच्च सर्वस्य वक्तव्यः ॥ * ॥

नुमयमः ॥ ४ ॥

नपुंसकस्य नुमागमो भवति शौ परे यमप्रत्याहारान्तस्य न भवति ॥४॥

मिदन्त्यात् स्वपरात्परो वक्तव्यः ॥ * ॥

नोपधायाः ॥ ५ ॥

नान्तस्योपधाया दीर्घो भवति शौ परे धिवर्जितेषु पञ्चसु नामिं च । कुलानि । हे कुल हे कुले हे कुलानि । पुनरपि कुलम् कुले कुलानि । शेषं देववत् । एवं मूलफलपत्रपुष्पकुण्डकुटुम्बादयः । सर्वादीनामकारान्तानामन्यादिपञ्चशब्दव्यतिरिक्तानां प्रथमाद्वितीययोः कुलशब्दवत्प्रक्रिया ॥ ५ ॥

स्त्वन्यादेः ॥ ६ ॥

अन्यादेर्गणात् परयोः स्यमोः स्तुर्भवति । शकारः शित् कार्यार्थः । उकार उच्चारणार्थः ॥ ६ ॥

वावसाने ॥ ७ ॥

अवसाने वर्तमानानां झसानां जबा भवन्ति चपा वा । अन्यत्, अन्यद्, अन्ये, अन्यानि । पुनरपि । अन्यत् अन्यद् अन्ये अन्यानि । अन्यतरत् अन्यतरद् अन्यतरे अन्यतराणि ॥ २ ॥ इतरत् इतरद् इतरे इतराणि ॥ २ ॥ कतरत् कतरद् कतरे कतराणि ॥ २ ॥ कतमत् कतमद् कतमे कतमानि ॥ २ ॥ शेषं सर्वशब्दवत् एते चान्यादयः ॥ ७ ॥

इकारान्तोऽस्थिशब्दः

नपुंसकात् स्यमोर्लुक् ॥ ८ ॥

नपुंसकलिंगात् परयोः स्यमोर्लुग् भवति । अस्थि ॥ ८ ॥

य्वृणाम् ॥ ९ ॥

इश्च उश्च ऋश्च य्वः तेषां य्वृणाम् (नपुंसके धौ वा गुणो वक्तव्यः ॥*॥ हे अस्थि हे अस्थे हे अस्थिनी हे अस्थीनि ॥ ९ ॥

उक्तं हि ।

सम्बोधने तूशनसस्त्रिरूपं सान्तं तथा नान्तमथाप्यदन्तम् ॥
माध्यान्दिनिर्वष्टि गुणं त्विगंते नपुंसके व्याघ्रपदां वरिष्ठः ॥ १ ॥

नामिनः स्वरे ॥ १० ॥

नाम्यन्तस्य नपुंसक[1]लिंगस्य नुमागमो भवति स्वरे परे । ईमौ ॥ अस्थिनी अस्थीनि ॥ १० ॥

आच्चास्थ्नां शसादौ ॥ ११ ॥

अस्थ्यादीनां नुमागमो भवति ईकारस्य चाकारो भवति शसादौ स्वरे परे ॥ ११ ॥

---

१ नपुंसकस्य इति किम् वातप्रम्ये ।

अल्लोपः स्वरे अम्वयुक्ताच्छसादौ ॥ १२ ॥

नानतस्योपधाया अकारस्य लोपो भवति शसादौ स्वरे परे तद्धिते ईपि ईकारे च मकारवकारान्तसंयोगादुत्तरस्य न भवति। अस्थ्ना अस्थिभ्याम् अस्थिभिः। अस्थ्ने अस्थिभ्याम् अस्थिभ्यः। अस्थ्नः अस्थिभ्याम् अस्थिभ्यः। अस्थ्नः अस्थ्नोः अस्थ्नाम् ॥ १२ ॥

वेङ्योः ॥ १३ ॥

ईङ्योः परयोर्वा अकारस्य लोपो भवति। अस्थ्नि अस्थानि। एवं दधिसक्थिअक्षिशब्दाः। दध्ना दधिभ्याम् दधिभिः। सक्थि सक्थिनी सक्थीनि ॥ २ ॥ सक्थ्ना सक्थिभ्याम् सक्थिभिः। अक्ष्णा अक्षिभ्याम् अक्षिभिः। इति पूर्ववत् प्रक्रिया ॥ १३ ॥

नपुसंकस्य ॥ १४ ॥

नपुंसकस्य ह्रस्वो भवति। नपुंसकात् स्यमोर्लुक् ॥ ग्रामणि। नामिन स्वरे। ईमौ। ग्रामणिनी ग्रामणीनि। नामिनः स्वरे नोपधाया इति दीर्घः ॥ १४ ॥

टादावुक्तपुंस्कं पुंवद्वा ॥ १५ ॥

उक्तपुंस्कं[1] नाम्यन्तं नपुंसकलिङ्गं टादौ स्वरे परे पुंवद्वा भवति। नामिनः स्वरे। ग्रामणिना ग्रामण्या ग्रामणिभ्याम् ग्रामणिभिः। ग्रामण्ये ग्रामणिने ग्रामणिभ्याम् ग्रामणिभ्यः। ग्रामण्यः ग्रामणिनः ग्रामणिभ्याम् ग्रामणिभ्यः। ग्रामण्यः ग्रामणिनः ग्रामण्योः ग्रामणिनोः ग्रामण्याम्। नुम-

---

१ यन्निमित्तमुपादाय पुंसिशब्दः प्रवर्तते ॥ नपुंसके तदेव स्यादुक्तपुंस्कं तदुच्यते ॥

न्तस्यापि दीर्घो नामिनः स्वरे । ग्रामणीनाम् । आम्ङेः । ग्रामण्याम् ग्रामणिनि ग्रामण्योः ग्रामणिनोः ग्रामणिषु । हे ग्रामणि हे ग्रामणिनी हे ग्रामणीनि । अतोऽम् सोमपम् सोमपे सोमपानि ॥ २ ॥ सोमपेन सोमापाभ्याम् सोमपैः । सोमपाय सोमपाभ्याम् सोमपेभ्यः । इति पूर्ववत् । उकारान्तो मधुशब्दः । नपुंसकात्स्यमोर्लुक् । मधु । नामिनः स्वरे इति नुमागमः । मधुनी । जश्शसोः शिः । नोपधाया इति दीर्घः । मधूनि पुनरपि । मधु मधुनी मधूनि । नामिनः स्वरे । मधुना मधुभ्याम् मधुभिः। पीलु पीलुनी पीलूनि । ऋकारान्तः कर्तृशब्दः । नपुंसकाम् स्यमोर्लुक् । कर्तृ । नामिनः स्वरे । घूर्नोणोऽनन्ते कर्तृणी कर्तॄणि ॥२॥ ऋरम् ॥ कर्त्रा कर्तृणा कर्तृभ्याम् कर्तृभिः । कर्त्रे कर्तृणे कर्तृभ्याम् कर्तृभ्यः ऋतोङ उः । स च डित् । डिति टेः । कर्तुः कर्तृणः कर्तृभ्याम् कर्तृभ्यः । कर्तुः कर्तृणः कर्त्रोः कर्तृणोः कर्तृणाम् । कर्तरि कर्तृणि कर्त्रोः कर्तृणोः कर्तृषु हे कर्तृ हे कर्तृणी हे कर्तॄणि । ऐकारान्तः अतिरैशब्दः रायमतिक्रान्तमतिरि कुलम् । नावमतिक्रान्तमतिनु जलम् । उपकारान्त उपगुशब्दः । उपगता गावोयस्येति तदुपगु ॥ १९ ॥

॥ इति स्वरान्ता नपुंसकलिंगाः ॥

अथ हसान्ताः पुँल्लिङ्गाः प्रदर्श्यंते ॥

तत्र हकारान्तः पुल्लिंगोऽनड्डुह्शब्दः । नामसंज्ञायां स्यादयः । पञ्चस्वनडुह आमागमो वक्तव्यः ॥*॥

---

१ एक एव हि यः शब्दस्त्रिषु लिंगेषु वर्तते ॥ एकमेवार्थमाख्याति उक्तपुंस्कं तदुच्यते ॥ पीलुर्वृक्षः फलं पीलुं पीलुने नतु पीलवे । वृक्षे निमित्तं पीलुत्वं तेजत्वं तत्फले पुनः॥ वचनेषु पंचसु परेषु ।

सावनडुहः ॥ १ ॥

अनडुहशब्दस्य सौ परे नुमागमो भवति ॥ १ ॥

संयोगान्तस्य लोपः ॥ २ ॥

संयोगान्तस्य लोपो भवति रसे पदान्ते च । रेफादुत्तरस्य सकारस्यैव लोपो नान्यस्य ॥ २ ॥

हसेपः सेर्लोपः ॥ ३ ॥

हसान्तादीबन्ताच्च परस्य सेर्लोपो भवति उवम् इति वत्वम् लोपाविधिसामर्थ्यान्न दत्वम् । अनड्वान् अनड्वाहौ अनड्वाहः । अनड्वाहम् अनड्वाहौ अनडुहः । अनडुहा अनडुद्भ्याम् अनडुद्भिः ॥ ३ ॥

वसां रसे ॥ ४ ॥

वंसु स्रंसु ध्वंसु भ्रंसु अनडुह इत्येतषां रसे पदान्ते च दत्वं भवति । अनडुहे अनडुद्भ्याम् अनडुद्भ्यः । अनडुहः अनडुद्भ्याम् अनडुद्भ्यः । अनडुहः अनडुहोः अनडुहाम् । अनडुहि अनडुहोः । खसे चपा झसानाम् अनडुत्सु ॥ ४ ॥

धावम् ॥ ५ ॥

अनडुहशब्दस्य धौ परे अवागमो भवति । सावनडुहः । उवम् । स्वरहीनं परेण संयोज्यम् । हे अनड्वन् हे अनड्वाहौ हे अनड्वाहः । इत्यादि । गोदुहशब्दस्य भेदः ॥ ५ ॥

---

१ नुम्विधिसामर्थ्यात् दत्वाभावः । २ सान्ते किम् विद्वान् ।

दादेर्घः ॥ ६ ॥

दादेर्धातोर्हकारस्य घत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च गोदुघ सि इतिस्थिते ॥ ६ ॥

आदिजबा झसान्तस्य झभाश्च स्ध्वोः ॥ ७ ॥

धातोर्झसान्तस्यादौ वर्त्तमानानां जबानां झभा भवन्ति सकारे ध्वश-ब्दे च परे नाम्नश्च रसे पदान्ते च ॥ ७ ॥

वावसाने ॥ ८ ॥

अवसाने वर्तमानानां झसानां जबा भवन्ति चपा वा । गोधुक् गो-धुग् गोदुहौ गोदुहः । गोदुहम् गोदुहौः गोदुहः । भकारादौ दादेर्घइ-घत्वे आदिजबानामित्यनेन दकारस्य धकारे च कृते झभेजबाः । गोधुग्-भ्याम् गोधुग्भिः । खसे चपा झसानां किलात् षः सः कृतस्येति षत्वम् क्षसंयोगे क्षः । हे गोधुग् । हे गोधुग हे गोदुहौ हे गोदुहः ॥ ८ ॥ मधुलिहशब्दस्य विशेषः ।

होढः ॥ ९ ॥

धातोर्हकारस्य ढत्वं भवति झसे परे नाम्नश्च रसे पदान्ते च । वाव-साने । मधुलिट् मधुलिड् मधुलिहौ मधुलिहः । हे मधुलिट् हे मधुलिड् हे मधुलिहौ हे मधुलिहः । मधुलिहम् मधुलिहौ मधुलिहः । मधुलिहा मधु-लिड्भ्याम् मधुलिड्भिः ॥ ९ ॥ तुरासाहशब्दस्य भेदः ।

---

१ तुरं सहते इति तुराषाट् इंद्रः ।

सहेः षः साढि १० ॥

साढि रूपे सति सहेर्धातोः सकारस्य षकारादेशो भवति । तुराषाड्
[तु]राषाट् इत्यादि ॥ १० ॥

द्रुहादीनां घत्वढत्वे वा ॥ ११ ॥

[द्रु]हादीनां धातूनां घत्वढत्वे वा भवतः रसे पदान्ते च । मित्रध्रुक् मित्र-
[ध्रु]ग् मित्रध्रुट् मित्रध्रुड् मित्रद्रुहौ मित्रद्रुहः । मित्रद्रुहम् मित्रद्रुहौ मित्रद्रुहः
मित्रद्रुहा । झवेजबाः मित्रध्रुग्भ्यां मित्रध्रुड्भ्याम् इत्यादि एवं
[मु]न्त्वमुहस्नुहशब्दौ ॥ ११ ॥ रेफान्तश्चतुरशब्दो नित्यं बहुवचनान्तः ॥

चतुराम् शौ च ॥ १२ ॥

चतुरशब्दास्यामागमो भवति पञ्चसु परेषु शौच । चत्वारः चतुरः
[च]तुर्भिः चतुर्भ्यः ॥ १२ ॥

रःसंख्यायाः ॥ १३ ॥

रेफान्तसंख्यायाः परस्यामो नुडागमो भवति । णत्वं द्वित्वम् । च-
[त]ुर्ण्णाम् चतुर्षु ॥ १३ ॥ नकारान्तो राजन्शब्दः । नोपधाया इति पं-
[प]ञ्चसु दीर्घः ।

नाम्नो नो लोपशधौ ॥ १४ ॥

नाम्नो नकारस्यानागमजस्य लोपश् भवति रसे पदान्ते चाधौ । राजा
राजानौ राजानः । राजानम् राजानौ । "अल्लोपः स्वरेऽम्वयुक्ताच्छ-
[स]सादौ" स्तोश्चुभिः श्चुरिति चुत्वेन नकारस्य ञकारः ॥ १४ ॥

---

१ वचनेषु ।

जञोर्ज्ञः ॥ १५ ॥

जकारञकारयोर्योगे[१] ज्ञो भवति । राज्ञः । राज्ञा । राज्ञे राजभ्याम् राजभ्यः । वेङ्स्योः । राज्ञि राजनि राज्ञोः राजसु इत्यादि । एवं यज्वन् आत्मन् स्वधर्मन् प्रभृतयः । अम्वयुक्तादिति विशेषणादल्लोपो नास्ति यज्वनः यज्वना इत्यादि । श्वन् युवन् मघवन् शब्दानां पञ्चसु राजन् शब्दवत् प्रक्रिया । शसादौ तु विशेषः ॥ १५ ॥

श्वादेः ॥ १६ ॥

श्वादेर्वकारस्य उत्वं भवति शसादौ स्वरे परे तद्धिते ईपि ईकारे च शुनः। शुना श्वभ्याम् श्वभिरित्यादि।।युवन्शब्दस्य वकारस्योत्वे कृते सवर्णे दीर्घः सह । यूनः । यूना युवभ्याम् युवभिरित्यादि । मघवा मघवानौ मघवानः । मघवानम् मघवानौ मघोनः । पथिन्शब्दस्य भेदः ॥ १६ ॥

इतोत्पञ्चसु ॥ १७ ॥

पथ्यादीनामिकारस्याकारादेशो भवति पञ्चसु परेषु ॥ १७ ॥

थो नुट् ॥ १८ ॥

पथ्यादीनां थकारस्य नुडागमो भवति पञ्चसु स्यादिषु परेषु । पन्थ न् सि इति स्थिते ॥ १८ ॥

आ सौ ॥ १९ ॥

पथ्यादीनां टेरात्वं भवति सौ परे । पन्थाः पन्थौ पन्थानः । आत्वविधानान्न सेलोपः । हे पन्थाः । पन्थानम् पन्थानौ ॥ १९ ॥

---

१ उभयथां संबन्धो योगः । २ मघवच्छब्दस्य "मघवा बहुलम् इत्यनेन शास्त्रेण तृभावे कृते मघवन् मघवन्तौ मघवन्तः। मघवन्तं मघवन्तौ मघवतः इत्यादि रूपाणि भवन्ति ।

पथां टेः ॥ २० ॥

पथ्यादीनां टेर्लोपो भवति शसादौ स्वरे परे तद्धिते ईपि इकारे च । यथा पथिभ्याम् पथिभिरित्यादि । एवं मथिन् ऋभुक्षिन्शब्दौ । दण्डिनशब्दस्य भेदः ॥ २० ॥

इनां शौ सौ ॥ २१ ॥

इन् हन् पूषन् अर्यमन् इत्येतेषां शौ सौ चाधौ परे उपधाया दीर्घो भवति । दण्डी दण्डिनौ दण्डिनः । हे दण्डिन् । दण्डिनम् दन्डिनौ दण्डिनः । दण्डिना दण्डिभ्याम् दण्डिभिः इत्यादि । ब्रह्महा ब्रह्महणौ ब्रह्महणः । हे ब्रह्महन् हे ब्रह्महणौ हे ब्रह्महणः । ब्रह्महणम् ब्रह्महणौ । शसादौ अकारलोपः ॥ २१ ॥

हनोघ्ने ॥ २२ ॥

हन्तेर्धातोर्हकारस्य घकारो भवति अव्यवधाने नकारे परे व्यवधाने ञ्णाति च परे । घसंयोगो णत्वनिषेधार्थः । ब्रह्मघ्नः ब्रह्मघ्ना ब्रह्महभ्याम् ब्रह्महभिरित्यादि पूषा पूषणौ पूषणः । हेपूषन् हे पूषणौ हे पूषणः। पूषणम् पूषणौ ॥ २२ ॥

ष्णः ॥ २३ ॥

षकारणकारसंयोगे ष्णो भवति शसादौ स्वरे परे । पूषन्शब्दस्य शसादौ स्वरे परे वा टेर्लोपः। पूष्णः । पूष्णा पूषभ्याम् पूषभिः । पूष्णे । ङा टिलोपो वेति केचित् । पूष्णि पूषणि पूषि पूष्णोः पूषसु । अर्यम्णः अर्यम्णा अर्यमभ्याम् इत्यादि संख्याशब्दाः पञ्चन्प्रभृतयो बहुचनान्तास्त्रिषु स्वरूपाः । पञ्चन् जस् इति स्थिते॥ २३ ॥

जश्शसोर्लुक् ॥ २४ ॥

षकारनकारान्तसंख्यायाः परयोर्जश्शसोर्लुक् भवति । "प्रत्य
लोपे प्रत्ययलक्षणम्" लुकि न तन्निमित्तम् । पञ्च । पञ्च । पञ्चभिः
पञ्चभ्यः ॥ २४ ॥

षणः ॥ २५ ॥

षकारनकारान्तसंख्यायाः परस्यामो नुडागमो भवति ।"नोपधायाः
इति दीर्घः । नाम्नो नो लोपशधौ । पञ्चानाम् पञ्चसु । एवं सप्तन् नव
दशन् प्रभृतयः ॥ २५ ॥

अष्टनो डौ वा ॥ २६ ॥

अष्टन्शब्दात् परयोर्जश्शसोर्वाडौ भवति । डित्वाट्टिलोपः । अ
अष्ट अष्ट ॥ २६ ॥

वासु ॥ २७ ॥

वा आ आसु । अष्टन् आसु परासु विभक्तिषु वा टेरात्वं भवति
अष्टभिः अष्टाभिः अष्टभ्यः अष्टाभ्यः ॥ २ ॥ अष्टानाम् । अष्टसु अष्टा
॥ २७ ॥ मकारान्त इदम्शब्दः ।

इदमोऽयं पुंसि ॥ २८ ॥

इदम्शब्दस्य पुंसि विषये अयमादेशो भवति सिसहितस्य । अयम्
द्विवचनादौ "त्यदादेष्टेरः स्यादौ इत्यकारः । इद आ इति स्थिते ॥२८

---

१ नलुमताङ्गस्यैति निषेधात् । २ प्रियाष्टन्शब्दस्य भेदः । जासि त्रीण्ये
रूपाणि चत्वारि शासि वै पुनः ॥ ङावपि त्रीणि रूपाणि शेषे द्वे द्वे प्रियाष्टनः ।

द्स्य मः ॥ २९ ॥

त्यदादीनां दकारस्य मत्वं भवति स्यादौ परे । इमौ इमे । सर्वादित्वाज्जासि इति इकारः । त्यदादीनां धेरभावः इमम् इमौ इमान् ॥

अन् टौसोः ॥ ३० ॥

इदमोऽनादेशो भवति टौसोः परयोः । अनेन ॥ ३० ॥

स्भ्यः ॥ ३१ ॥

इदमः सकारे भकारे च परे अकारो भवति कृत्स्नस्य अङ्घीत्यात्वम् । आभ्याम् ॥ ३१ ॥

भिस्भिस् ॥ ३२ ॥

इदमदसोर्भिस् भिसेव भवति । न भकारस्याकारः । "एस्भिबहुत्वे" एभिः । अस्मै आभ्याम् एभ्यः । अस्मात् आभ्याम् एभ्यः । अस्य अनयोः एषाम् । अस्मिन् अनयोः एषु । किमशब्दस्य त्यदादेष्टेरः स्यादविति सर्वत्राकारे कृते सर्वशब्दवद्रूपम् । कः कौ के । कम् कौ कान् । इत्यादि । धकारांतस्तत्त्वबुध्शब्दः । तस्य रसे पदान्ते चादिजबानामिति भकारः । वावसाने । तत्त्वभुत् तत्त्वभुद् तत्त्वबुधौ तत्त्वबुधः । हे तत्त्वभुत् । तत्त्वबुधम् तत्त्वबुधौ तत्त्वबुधः। तत्त्वबुधा तत्त्वभुद्भ्याम् तत्त्वभुद्भिः। इत्यादि ॥ ३२ ॥ जकारान्तः सम्राज् शब्दः ।

---

१ इदमोऽपि अन्वादेशे द्वितीयाटौःस्वेनादेशो वक्तव्यः । उक्तस्य पुनर्भाषणमन्वादेशः ॥ एवं च एनम् एनौ एनान्, एनेन, एनयोः इत्यादि रूपाणि भवन्ति । २ तत्त्वं बोधतीति तत्त्वबुध् ॥

छशषराजादेः षः ॥ ३३ ॥

छकारान्तस्य षकारान्तस्य च राज् यज् सृज् मृज् भ्राजादेश्च षक भवति । धातोर्झसे परे नाम्नश्च रसे पदान्ते च ॥ ३३ ॥

षोडः ॥ ३४ ॥

षकारस्य डत्वं भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च वावसाने टकारः डकारश्च । सम्राट् सम्राड् सम्राजौ सम्राजः । सम्राज सम्राजौ सम्राजः । सम्राजा सम्राड्भ्याम् सम्राड्भिः इत्यादि । विराजादयः । दकारान्तात्स्यद् तद् यद् एतद् शब्दा एतेषां त्यदादे स्यादाविति सर्वत्राकारे कृते सर्वशब्दवद्रूपं ज्ञेयम् ॥ ३४ ॥

स्तः ॥ ३५ ॥

त्यदादेस्तकारस्य सौ परे सत्वं भवति । स्यः त्यौ त्ये । त्यम् त्य त्यान् । सः तौ ते । तम् तौ तान् । यः यौ ये । यम् यौ यान् । ए एतौ एते । (एतदोऽन्वादेशे द्वितीयाटौस्स्वेनो वा वक्तव्यः ॥ *)

उक्तस्य पुनरुक्तमन्यादेशः । यथाऽनेन बालेन व्याकरणमधीतम् ए छन्दोऽध्यापय । एतम् एनम् एतौ एनौ एतान् एनान् । एतेन एने एताभ्याम् एतैः । एतयोः एनयोः एतेषाम् । एस्मिन् एतयोः एनयो एतेषु । छकारान्तस्तत्त्वप्राच्छब्दः तत्त्वप्राट् तत्त्वप्राड् तत्त्वप्रा तत्त्वप्राच्छः । इत्यादि ॥ ३५ ॥

---

१ षस्य षत्वं डित्वनिषेधार्थम् । तेन आख्याते द्वेष्टीत्यादौ न भवति
२ सम्यक् राजते असौ सम्राट् (मण्डलेश्वरः) ३ विशेषेण राजते असौ विराट्

नोलेपः ॥ ३६ ॥

धातोर्हसान्तस्योपधाभूतस्य लोपो भवति (अञ्चेः पञ्चसु नुम् वक्तव्यः ॥ * ॥ प्रत्यन् च् इति स्थिते । स्तोश्चुभिश्चुरिति चुत्वेनात्र ञकारः । संयोगान्तस्य लोपः ॥ ३६ ॥

चोः कुः ॥ ३७ ॥

चवर्गस्य कवर्गादेशो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च यथासंख्येन । प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चम् प्रत्यञ्चौ ॥ ३७ ॥

अञ्चेरलोपो दीर्घश्च ॥ ३८ ॥

अञ्चेर्धातोरकारस्य लोपो भवति पूर्वस्य च दीर्घः शसादौ स्वरे तद्धिते ईपीकारे च । निमित्ताभावे नैमित्तिकस्याप्यभावः । प्रतीचः । प्रतीचा प्रत्यग्भ्याम् प्रत्यग्भिः । प्रत्यक्षु । एवं तिर्य्यच्प्रभृतयः ॥ तिर्य्यङ् तिर्य्यञ्चौ तिर्य्यञ्चः । तिर्य्यञ्चम् तिर्य्यञ्चौ ।

तिरश्चादयः ॥ ३९ ॥

तिरश्चादयो निपात्यन्ते शसादौ स्वरे परे तद्धिते ईपि इकारे च । तिरश्चः तिरश्चा तिर्य्यग्भ्याम् तिर्य्यग्भिः । तिर्य्यक्षु । उदच्शब्दस्य उदीचइति निपात्यते शसादौ स्वरे परे । उदीचः उदीचा इत्यादि । एवमग्निचित् ॥ ३९ ॥ तकारान्त ऋकारानुबन्धो महच्छब्दः[2] ।

वृतो नुम् ॥ ४० ॥

उकारानुबन्धस्य ऋकारानुबन्धस्य च नुमागमो भवति पुंसि पञ्चसु परेषु[1] ॥ ४० ॥

---

१ स्यादि वचनेषु ॥ २ मह्यते पूज्यते इति महान् ।

नृसंमहतो धौ दीर्घः शौच ॥ ४१ ॥

नृसन्तस्याप्शब्दस्य महच्छब्दस्य च उपधाया दीर्घो भवति पञ्च
धिवर्जितेषु शौच परे । महान् महान्तौ महान्तः । महान्तम् महान्तौ महत
महता महद्भ्याम् महद्भिः । इत्यादि । हे महन् ॥ ४१ ॥

उकारानुबन्धो भवत् शब्दः ।

अत्वसोः सौ ॥ ४२ ॥

अत्वन्तस्यासन्तस्य च दीर्घो भवति धिवर्जितेषु शौ च परे । भवा
भवन्तौ भवन्तः । इत्यादि ॥ ऋकारानुबन्धस्य भवच्छब्दस्य नुमाग
एव न दीर्घः । भवन् भवन्तौ भवन्त इत्यादि पठन् पठन्तौ पठन्तः । प
न्तम् पठन्तौ । पचन् पचन्तौ पचन्तः । इत्यादि ।

शकारान्तो विश् शब्दः । "छशषराजादिनांषत्वं षोडः षकार
डत्वं च" । वावसाने चपा जबाश्च । विट् विड् विशौ विशः । षकारान्
षष् शब्दो नित्यं बहुवनान्तास्त्रिषु सरूपः । जश्शसोर्लुक् । षोडः । ष
षड् षड्भिः षड्भ्यः ॥ २ ॥ ष्णः इति नुडागमः । षड् नाम् इ
स्थिते ॥ ४२ ॥

डणः ॥ ४३ ॥

संख्यासम्बन्धिनो डकारस्य णत्वं भवति नामि परे । "ष्टुभिष्टुः"
षण्णाम् । षट्सु । क्वचिदपदान्ते पदान्तताश्रयणीया ॥ ४३ ॥

दोषां रः ॥ ४४ ॥

दोष् सजुष् आशिष् हविष् प्रभृतीनां षकारस्य रेफो भवति स

---

१ शत्रन्तस्यात्वन्तत्वाभावान्न दीर्घः ॥

पदान्ते च । दोः दोषौ दोषः । दोषम् दोषौ (दोष्शब्दस्य शसादौ स्वरे परे नान्तता वा वक्तव्या * दोषः दोष्णः । दोषा दोष्णा । दोर्भ्याम् दोष्भ्याम् इत्यादि । सजूः सजुषौ सजुषः । (सजुषाशिषोररसे पदान्ते च दीर्घो वक्तव्यः * सजूर्भ्यामित्यादि ॥ ४४ ॥

पुंसोऽसुङ् ॥ ४५ ॥

पुंस्शब्दस्य पञ्चसु परेषु असुङादेशो भवति । ङकारान्तोऽन्त्यादेशार्थः ॥ ४५ ॥

स्वरे मः ॥ ४६ ॥

अनुस्वारस्य मकारो भवति स्वरे परे । पुम् अस् इति स्थिते । वृतोनुम् । "नसंमहतोऽधौ दीर्घः शौच" । "संयोगान्तस्य लोपः" । पुमान् पुमांसौ पुमांसः । पुमांसम् पुमांसौ पुंसः । पुंसा पुंभ्याम् पुंभिः । हे पुमन् ॥ ४६ ॥

असंभवे पुंसः कक्सौ ॥ ४७ ॥

वेदान्तैकवेद्यस्यात्मनो बहुत्वासम्भवेऽर्थवाच्ये सति पुंस्शब्दस्य सपि परे कगागमो भवति ॥ ४७ ॥

स्कोराद्योश्च ॥ ४८ ॥

संयोगाद्योः सकारककारयोर्लोपो भवति धातोर्झसे परे नाम्नश्च रसे पदान्ते च । पुंक्षु । विद्वान् विद्वांसौ विद्वांसः । विद्वांसम् विद्वांसौ ॥ ४८ ॥

---

१ वेत्तीति विद्वान् ।

वसोर्व उः ॥ ४९ ॥

वसोः सम्बन्धिनो वकारस्य उत्वं प्राप्नोति शसादौ स्वरे परे तति
ईपि ईकारे च। विदुषः विदुषा ॥ “ वसांरसे ” विद्वद्भ्याम् विद्वद्भिः
विद्वत्सु। इत्यादि। सुवचस्शब्दस्य अत्वसोः सौ इति दीर्घः। सुवचा
सुवचसौ सुवचसः। हे सुवचः। सुवचसम् सुवचसौ सुवचसः। सुवच
सुवचोभ्याम् सुवचोभिः ॥ ४९ ॥ उशनस्शब्दस्य भेदः।

उसनसाम् ॥ ५० ॥

उशनस् पुरुदंशस् अनेहस् इत्येतेषां सेरघेर्डा भवति। डकारष्टिलो
पार्थः। उशना। उशनसौ ॥ (धौ सान्तता नान्तता अदन्तता वा
वक्तव्या ॥ * ॥) हे उशनः हे उशनन् हे उशन। अदस्शब्दस्य
विशेषः त्यदादेष्टेरिति सर्वत्राकारः अद् सि इति स्थिते ॥ ५० ॥

सौसः ॥ ५१ ॥

अदसो दकारस्य सौ परे सत्वं भवति ॥ ५१ ॥

सेरौ ॥ ५२ ॥

अदसः सेरौ भवति। असौ। द्विवचने अदस् औ इति स्थिते।
दस्य मः ॥ ५२ ॥

मादू ॥ ५३ ॥

उश्च ऊश्च ऊ। अदसो मकारात्परस्य ह्रस्वस्य ह्रस्व उकारो भवति
दीर्घस्य च दीर्घ ऊकारो भवति। अमू। बहुवचने सर्वादित्वाज्जसि
अद ए अमे इति स्थिते ॥ ५३ ॥

एरीबहुत्वे ॥ ५४ ॥

बहुत्वे सति मकारात् परस्यादस एकारस्य ईकारो भवति । अमी अमुम् अमून् । मत्वे उत्वे च कृते टानास्त्रियाम् । अमुन । द्विवचने अद्धीत्यात्वम् पश्चादूकारः । अमूभ्याम् ॥ ५४ ॥

भिस्भिस् ॥ ५५ ॥

इदमदसोर्भिस् भिसेव भवति न भकारस्याकारः । अमीभिः । अमुष्मै अमूभ्याम् अमीभ्यः । अमुष्मात् अमूभ्याम् अमीभ्यः । अमुष्य ओसि एत्वे अयादेशे च कृते पश्चादुकारः । अमुयोः अमीषाम् । अमुष्मिन् अमुयोः अमीषु ॥ ५५ ॥

सामान्ये अदसः कः स्यादिवञ्च ॥५६॥

अमुकः अमुकौ अमुके ॥ ५६ ॥

इति हंसान्ताः पुंलिङ्गाः ।

अथ हसान्ताः स्त्रीलिङ्गाः ।

तत्र हकारान्त उपनाह् शब्दः ।

नहो धः ॥ १ ॥

नहो हकारस्य धकारादेशो भवति धातोर्झसेपरे नाम्नश्च रसे पदान्ते च । वावसाने धस्य दत्वम् तत्वम् । उपानत् उपानद् उपानहौ

---

१ होढः इत्यतो हस्येत्यनुवर्तते ॥ २ उपपूर्वान्नहेः क्विप् । नहि वृत्ति पूर्वपदस्य दीर्घः उपनह्यते इति उपानत् ॥

उपानहः । हे उपानत् । उपानहम् उपानहौ उपानहः । उपानहा उपानद्भ्यां उपानद्भिः । इत्यादि ॥ १ ॥

वकारान्तो दिव् शब्दः ।

दिव औ ॥ २ ॥

दिवो वकारस्य औकारादेशो भवति सौ परे । द्यौः दिवौ दिवः । हे द्यौः ॥ २ ॥

वामि ॥ ३ ॥

दिवो वकारस्य अमि परे वा आत्वं भवति । द्याम् दिवम् दिवौ दिवः । दिवा ॥ ३ ॥

उरसे ॥ ४ ॥

दिवोवकारस्य पदान्ते च रसे परे तकारो भवति । द्युभ्याम् द्युभिः । द्युषु । इत्यादि ॥ ४ ॥ रेफान्तश्चतुरशब्दो नित्यं बहुवचनान्तः ॥

त्रिचतुरोः स्त्रियां तिसृचसृवत् ॥ ५ ॥

स्त्रियां वर्तमानयोः त्रिचतुर्शब्दयोः तिसृचतसृ इत्येतावादेशौ भवतः विभक्तौ परतः ऋकारश्च ऋकारवत् । ततस्तुरार् इत्यार् न भवति । तिस्रः तिस्र तिसृभिः तिसृभ्यः ॥ ५ ॥

न नामि दीर्घः ॥ ६ ॥

तिसृचतसृ इत्येतयोर्दीर्घो न भवति नामि परे छन्दसि वा । तिसृणाम् । छन्दसि तु भवति । तिसॄणाम् । तिसृषु । एवं चतसृ । गिर्-शब्दस्य भेदः ॥ ६ ॥

य्वोर्विहसे ॥ ७ ॥

धातोरिकारोकारयोर्दीर्घो भवति रेफवकारयोर्हसपरयोः पदान्ते च । गीः गिरौः गिरः । हे गीः । गिरम् गिरौ गिरः । गिरा गीर्भ्याम् गीर्भिः । गीर्षु । एवं धूः धुरौ धुरः । हे धूः । पूः पुरौ पुरः । हे पूः । पुरा पुर्भ्याम् पूर्भिः । पूर्षु । धकारान्तः समिध् शब्दः । समित् समिद् समिधौ समिधः । हे समिद् हे समित् । समिद्भ्याम् समिद्भिः । समित्सु । भकारान्तः ककुभ्शब्दः । ककुप् ककुब् ककुभौ ककुभः । हे ककुप् हे ककुब् इत्यादि । दकारान्तास्त्यदादयस्तेषां त्यदादेष्टेरिति सर्वत्राकारः । आबन्तस्त्रियामित्याप् । स्या त्ये त्याः । सा ते ताः । या ये याः । एषा एते एताः । अन्वादेशे । एताम् एनाम् एते एने एताः एनाः । एवं किम्शब्दः । का के काः ॥ ७ ॥

इयं स्त्रियाम् ॥ ८ ॥

इदम्शब्दस्य स्त्रियामियम् भवति सिसहितस्य । इयम् इमे इमाः । इमाम् इमे इमाः । अनया आभ्याम् आभिः । अस्यै आभ्याम् आभ्यः । इत्यादि । चकारान्तस्त्वच्शब्दः । चोः कुरिति कुत्वम् । त्वक् त्वग् त्वचौ त्वचः । त्वग्भ्याम् । त्वक्षु । हे त्वक् । एवम् ऋच् वाच् प्रभृतयः । अप्शब्दो नित्यं बहुवचनान्तः । अप् जस् इति स्थिते । न्सम्महत इति दीर्घः । आपः द्वितीयाबहुचने पञ्चसु इति विशेषणात् न दीर्घः अपः ॥ ८ ॥

भिदपाम्[1] ॥ ९ ॥

---

१ अत्र अपामिति बहुवचनज्ञापकादप्शब्दो बहुवचनान्तः ।

अबादीनां भकारे परे दत्वं भवति । अद्भिः अद्भ्यः । अद्भ्यः । अपाम् अप्सु ॥ ९ ॥ शकारान्तो दिश् शब्दः ॥

दिशां कः ॥ १० ॥

दिश् दृश् स्पृश् इत्यादीनां रसे पदान्ते च कत्वं भवति । दिक् दिग् दिशौ दिशः । हे दिक् हे दिग् । दिशम् दिशौ दिशः। दिशा दिग्भ्याम् । दिग्भिरित्यादि । षकारान्तस्त्विष् शब्दः । षोडइति डत्वम् वावसाने टकारः । त्विट् त्विड् त्विषौ त्विषः । त्विषा त्विड्भ्याम् त्विड्भिः इत्यादि । आशिष्शब्दस्य सजुष् शब्दवद्रूपं ज्ञेयम् । आशीः आशिषौ आशिषः । आशीर्भ्याम् । आशीष्षु । हे आशीः । स्त्रीलिङ्गस्यादस् शब्दस्य सौ न विशेषः । द्विवचनादौ टेरत्वे च कृते अनन्तरमाबतः स्त्रियामित्याप् दीर्घत्वं विभक्तिकार्यं पश्चान्मादू इति ह्रस्वस्य दीर्घस्य उकार ऊकारश्च । असौ अमू अमूः । अमुया अमूभ्याम् अमूभिः । अमुष्यै अमूभ्याम् अमूभ्यः । अमुष्याः अमूभ्याम् अमूभ्यः । अमुष्याः अमुयोः अमूषाम् । अमुष्याम् अमुयोः अमुषु ॥ १० ॥ (सामान्ये अदसः कःस्यादिवच्च) अमुका अमुके अमुकाः ।

इति हसान्ताः स्त्रीलिङ्गाः ॥

अथ हसान्ता नपुंसकलिंगाः प्रदर्श्यन्ते ।

रेफान्तो वार्शब्दः ।

नपुंसकात्स्यमोर्लुक् ॥ १ ॥

वाः वारी वारि । २ अयम् इति विशेषणात् नुम् न भवति । वारा

वार्भ्याम् वार्भिः। वारे। इत्यादि। चतुरशब्दे चतुराम्शौचेत्याम्। चत्वारि। चत्वारि। चतुर्भिः। चतुर्भ्यः। चतुर्भ्यः। चतुर्णाम्। चतुर्षु ॥ १ ॥

नकारान्तोऽहन् शब्दः।

अह्नः सः ॥ २ ॥

अहन्शब्दस्य नकारस्य सकारो भवति रसे पदान्ते च। "स्रोर्विसर्गः"। अहाः इमौ वेङ्यो:। अह्नी अहनी अहानि। अह्ना अहोभ्याम् अहोभिः। अह्ने अहोभ्याम् अहोभ्यः। अह्नः अहोभ्याम् अहोभ्यः। अह्नः अह्नोः अह्नाम्। अह्नि अह्नोः अहस्सु (ब्रह्मन्शब्दस्य रसे पदान्ते च न लोपो वक्तव्यः ॥ * ॥ ब्रह्म ब्रह्मणी ब्रह्माणि। पुनः। ब्रह्म ब्रह्मणी ब्रह्माणि। ब्रह्मणा ब्रह्मभ्याम्। इत्यादि (सम्बोधने धौ नपुंसके नलोपो वा वक्तव्यः * ॥ हे ब्रह्म ब्रह्मन्। एवं चर्मन् वर्मन् शर्मन् कर्मन् व्योमन् दामन् नामन् प्रभृतयः। (नान्तादन्ताच्छन्दसि ङिस्योर्वालोपोवक्तव्यः * ॥) छन्दस्यागमजानागमजयोर्लोपालोपौ च वक्तव्यौ *) परमेव्योमन् सर्वाभूतानि। त्यदादीनां स्यमोर्लुकि कृते टेरत्वं न भवति स्यादाविति विशेषणात् द्विवचनादौ टेरत्वे कृते सर्वशब्दवद्रूपं ज्ञेयम्। त्यत् त्ये त्यानि। पुनः त्यत् त्ये त्यानि। त्येन त्याभ्याम्। त्यैरित्यादि एवं तत् ते तानि। २। यत् ये यानि। २। एतत् एते एतानि। २। किम् के कानि। २। इदम् इमे इमानि २। तृतीयादौ सर्वत्र पुंवत्। चकारान्तः प्रत्यच् शब्दः। प्रत्यक् प्रत्यग्। अञ्चेरलोपो दीर्घश्च। प्रतीची। "नुमयमः"। प्रत्यञ्चि।

तकारान्तो जगत्शब्दः। जगत् जगती जगन्ति। २। जगता जगद्भ्याम्
जगद्भिरित्यादि। महच्छब्दे तु न सम्महत इति सिविषये दीर्घो न।
महत् महती महान्ति। २। इत्यादि। षकारान्तो हविष्शब्दः सजुष्
च हविः हविषी हवींषि। २। इत्यादि। सजूः सजुषी सजूंषि। २
एवं सकारान्तः पयस् तेजस् वर्चस् प्रभृतयः। पयः पयसी पयांसि। २
पयसा पयोभ्यामित्यादि अदस्शब्दस्य स्यमोर्लुकि कृते स्रोर्विसर्गः।
द्विवचनादौ टेरत्वे कृते मत्वोत्वे। अदः अमू अमूनि। पुनः। २।
अमुना अमूभ्याम् अमीभिः अमुष्मै अमूभ्याम् अमीभ्यः। अमुष्मात्
अमूभ्याम् अमीभ्यः।अमुष्य अमुयोः अमीषाम्।अमुष्मिन् अमुयोः अमीषु।

॥ इति हसान्ता नपुंसकलिङ्गाः ॥

अथ युष्मदस्मदोः स्वरूपं निरूप्यते तयोश्च वाच्यलिङ्गत्वात्[१] त्रिष्वपि लिङ्गेषु समानं रूपम्।

त्वमहं सिना ॥ १ ॥

युष्मदस्मदोः सिसहितयोस्त्वमहमित्येतावादेशौ भवतः यथासंख्येन। त्वम् अहम् ॥ १ ॥

युवावौ द्विवचने ॥ २ ॥

युष्मदस्मदोर्द्विवचने परे युवाव इत्येतावादेशौ भवतः ॥ २ ॥

आमौ ॥ ३ ॥

---

१ वाच्यवस्तुसदृशं लिङ्गं ययोस्तौ। वाच्यमित्युच्यते भेद्यं तल्लिङ्गं भजते तु यः ॥ विशेषणत्वमापन्नो वाच्यलिङ्गः स उच्यते ॥

युष्मदस्मदोः पर औ आम् भवति । सवर्णे दीर्घः सह इति दीर्घे युवाम् आवाम् ॥ ३ ॥

यूयं वयं जसा ॥ ४ ॥

जसा सहितयोर्युष्मदस्मदोर्यूयम् वयम् इत्येतावादेशौ भवतः । यूयम् वयम् ॥ ४ ॥

त्वन्मदेकत्वे ॥ ५ ॥

युष्मदस्मदोः त्वत् मत् इत्येतावादेशौ भवतः एकत्वे गम्यमाने । एकत्वं नाम एकार्थवाचित्वं नत्वेकवचनम् । तेन त्वत्पुत्रो मत्पुत्र इत्यादौ त्वन्मदादेशौ भवत एव ॥ ५ ॥

आमस्भौ ॥ ६ ॥

युष्मदस्मदोष्टेरात्वं भवति अमि सकारे भिसि च परे । त्वाम् माम् युवम् आवाम् । त्यदादेष्टेरत्वे कृते शसीति दीर्घत्वम् । (शसो नो वक्तव्यः ॥ * ॥) युष्मान् अस्मान् । त्वन्मदादेशे कृते ॥ ६ ॥

ए टाङ्ग्योः ॥ ७ ॥

युष्मदस्मदोष्टेरत्वं भवति टा ङि इत्येतयोः परयोः । अयादेशः त्वया मया । युवाभ्याम् । युष्माभिः अस्माभिः ॥ ७ ॥

तुभ्यं मह्यं ङ्या ॥ ८ ॥

ङेसहितयोर्युष्मदस्मदोस्तुभ्यम् मह्यमित्येतावादेशौ भवतः । तुभ्यम् मह्यम् युवाभ्याम् आवाभ्याम् ॥ ८ ॥

भ्यस श्भ्यम् ॥ ९ ॥

युष्मदस्माभ्यां परो भ्यस् श्भ्यम् भवति । शकारो भकारादित्वव्यावृत्त्यर्थः । तेनात्वैत्वे न भवतः । युष्मभ्यम् अस्मभ्यम् ॥ ९ ॥

ङसिभ्यसोःश्तुः ॥ १० ॥

पञ्चम्या ङसिभ्यसोः श्तुर्भवति । शकारः सर्वादेशार्थः त्वत् मत् । युवाभ्याम् । आवाभ्याम् । युष्मत् ॥ १० ॥

तव मम ङसा ॥ ११ ॥

ङसा सहितयोर्युष्मदस्मदोस्तव मम इत्येतावादेशौ भवतः । तव मम । युवयोः आवयोः । सर्व्वादित्वात्सुट् ॥ ११ ॥

सामाकम् ॥ १२ ॥

युष्मदस्मद्भ्यां परः साम आकम् भवति । युष्माकम् अस्माकम् । त्वयि मयि । युवयोः आवयोः युष्मासु अस्मासु । अथाऽनयोरादेशविशेषे विधिः प्रदर्श्यते ॥ १२ ॥

युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयाभिस्ते मे वांनौ वस्नसौ ॥ १३ ॥

युष्मदस्मदोर्यथासंख्येनामी आदेशाः स्युः तत्रैकवचनेन सह ते मे भवतः । द्विवचनेन सह वां नौ बहुवचनेन सह वस्नसौ । उक्तं च ।

---

१ यदा एकत्वे द्वित्वे च युष्मदस्मदी समासार्थस्तु अन्यसंख्यस्तदा त्वन्मदादौ युवावौ च भवतः । वैपरीत्ये तु न स्तः । सि, जस्, ङे ङस्सु परेषु ये आदेशास्ते सदा भवेयुः ।

स्वामी ते स समायातः स्वामी मे साम्प्रतं गतः । नमस्ते भगवन् भूयो देहि मे मोक्षमक्षयम् ॥ १ ॥ स्वामी वां स जहासोच्चैर्दृष्ट्वा नौ दानयाचनाम् । राजा वां दास्यते दानं ज्ञानं नौ मधुसूदनः ॥ २ ॥ देवो वामवताद्विष्णुर्नरकान्नौ जनार्दनः ॥ ३ ॥ स्वामी वो बलवान् राजा स्वामी नोऽसौ जनार्दनः ॥ ३ ॥ नमो वो ब्रह्मविज्ञेभ्यो ज्ञानं नौ दीयतां धनम् । सानदान्वः प्रपश्यामः पश्यामो नः सुदुःखिनः ॥ ४ ॥ १३ ॥

त्वामाऽमा ॥ १४ ॥

अमा सहितयोर्युष्मदस्मदोस्त्वामादेशौ भवतः । पश्यामि त्वा मदालीढं पश्य मा मद्भेदकम् । पश्यामि त्वा जगत्पूज्यं पश्य मा जगतां पतिम् ॥ १४ ॥

नादौ ॥ १५ ॥

पादादौ वर्तमानयोर्युष्मदस्मदोर्नैते आदेशा भवन्ति । रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता । स एव नाथो भगवानस्माकं पापनाशनः । पादादाविति किम् । पान्तु वो नरसिंहस्य नखलांगूलकोटयः । हिरण्यकशिपोर्वक्षःक्षेत्रासृक्कर्दमारुणाः ॥ १५ ॥

चादिभिश्च ॥ १६ ॥

चादिभिरपि योगे नैते आदेशा भवन्ति । तव चायं प्रभुर्विष्णुर्मम चायं तथैव च । तव ये शत्रवो राजन् मम तेऽप्यतिशत्रवः ॥ १६ ॥

चादिर्निपातः ॥ १७ ॥

चादिर्गणो निपातसंज्ञको भवति । च वा ह अह एव एवं नूनं पृथक् विना नाना स्वस्ति अस्ति दोषा मृषा मिथ्या मिथस् अथ अथो ह्यस् श्वस् उच्चैस् नीचैस् शनैस् स्वर् अन्तर् प्रातर् पुनर् भूयस् आहोस्वित् उत् सह ऋते अन्तरेण अन्तरा नमस् अलम् कृतम् " अमानोनाः प्रतिषेधे " ईषत् किल खलु वै आरात् भृशम् यत् तत् स्वराश्च इत्येवं चादिर्गणो निपातसंज्ञो भवति ॥ तत्रादिर्गणो विभक्त्यर्थे निपात्यते । तस्मिन्निति तत्र । यस्मिन्निति यत्र । कस्मिन्निति कुत्र क्व कुह । अस्मिन्निति अत्र । कस्मिन् काले कदा । तस्मिन् काले तदा । यस्मिन् काले यदा । सर्वस्मिन्काले सर्वदा । एकदा । तेन प्रकारेण तथा एवं यथा । केन प्रकारेण कथम् । अनेन प्रकारेण इत्थं । तस्मादिति ततः । एवं कुतः अतः इतः । सार्वविभक्तिकस्तासित्येके । पूर्वस्मिन्निति पुरस्तात् परस्मिन्निति परेण । आहि च दूरे दक्षिणाहि वसन्ति चाण्डालाः (किमः सामान्ये चिदादिः) कश्चित् कश्चन क्वचन कौचित् केचित् । तदधीनकार्त्स्न्ययोर्वा सात् ।) राजाधीनं राजसात् । सर्वं भस्मकरोति इति भस्मसात् (ऊर्युररंगीकरणे) ऊरीकृत्य उररीकृत्य । (सद्य आदिः काले निपात्यते) सद्यः अद्य सपदि अधुना सांप्रतम् । शीघ्रम् झटिति पूर्वेद्युः अन्येद्यु. परेद्युः उभयेद्युः । यर्हि तर्हि काले ॥ १७ ॥

---

१ निश्चीय पतन्ति अनेकेष्वर्थेष्विति निपाताः । निपाताश्चोपसर्गाश्च धातवश्चेति तत्रयः ॥ अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥

प्रादिरुपसर्गाः ॥ १८ ॥

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, अन्तर्, आविर्, अयं गण उपसर्गसंज्ञकः ॥ १८ ॥

प्राग्धातोः ॥ १९ ॥

उपसर्गा धातोः प्राक् प्रयोक्तव्याः ॥ १९ ॥

तदव्ययम् ॥ २० ॥

तदिदं प्रादि चादिशब्दरूपमव्ययसंज्ञं भवति ॥ २० ॥

क्त्वाद्यन्तं च ॥ २१ ॥

क्त्वा क्यप् तुम् नम् च्वि डा धा वतु आम् कृत्वम् शस् इत्येतदन्तं शब्दस्वरूपमव्ययं स्यात् ॥ २१ ॥

अव्ययाद्विभक्तेर्लुक् ॥ २२ ॥

अव्ययात्परस्या विभक्तेर्लुग्भवति न तु शब्दानिर्देशे । अव्ययानां न च लिङ्गादिनियमः । उक्तंहि । ‘सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु । वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥’ उक्तान्यव्ययान्यलिङ्गानि ॥ २२ ॥ इत्यव्ययानि ॥

॥ अथ स्त्रीप्रत्ययाः ॥

अधुना लिङ्गविशेषविजिज्ञापयिषया स्त्रीप्रत्ययाः प्रस्तूयन्ते ।

आबतः स्त्रियाम् ॥ १ ॥

आकारान्तान्नाम्नः स्त्रियां वर्त्तमानादाप्प्रत्ययो भवति । जाया माया मेधा श्रद्धा धारा इत्यादि ॥

(अजादेश्चाप्वक्तव्यः * ।)

अजा एडका कोकिला बाला वत्सा शूद्रा गणिका ॥ १ ॥

काप्यतः ॥ २ ॥

स्त्रियां कापि परे पूर्वस्याकारस्य इकारो भवति ॥ कन्यकादौ न भवति । कारिका । पाठिका । कालिका । तालिका । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपश्चैव हसान्तानां यथा वाचा निशा दिशा । अवगाहः वगाहः अपिधानम् पिधानम् ॥ १ ॥

ह्रस्वो वा ॥ ३ ॥

स्त्रियाम् कापि परे तकारादौ च पूर्वस्य ह्रस्वो वा भवति । वेणिका वेणीका । नदिका नदीका । श्रेयसितरा श्रेयसीतरा । श्रेयसितमा श्रेयसीतमा । नौकादौ न भवति वाग्रहणादियं विवक्षा । निश्चयेन प्रयतन्त्यनेकेष्वर्थेष्विति निपातानामनेकार्थत्वात् ॥ ३ ॥

न्रण ईप् ॥ ४ ॥

नकारान्ताद्दकारान्तादणन्ताच्च स्त्रियामीप्प्रत्ययो भवति । दण्डिनी । दन्तिनी । करिणी । मालिनी । ईपि राज्ञोऽल्लोपो वक्तव्यः । * । राज्ञी शुनी कर्त्री हर्त्री औपगवी ॥ ४ ॥

---

१ अजाश्वा कोकिला बाला वत्सादौ त्रिफलादिके ॥ ईबादेरपवादार्थमजादेर्ग्रहणं पृथक् ॥ १ ॥ २ अतः किम् नौका ।

३ निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः ॥ अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥

यस्य लोपः ॥ ५ ॥

इश्च अश्च यस्तस्य लोपो भवति स्वरे यकारे च परे ॥ ५ ॥

षिट्वितः ॥ ६ ॥

षकारटकारउकारऋकारानुबन्धाच्च स्त्रियामीप्प्रत्ययो भवति । ष वराकी । ट कुरुचरी । उ गोमती ॥ ६ ॥

अप्ययोरान्नित्यम् ॥ ७ ॥

अप्प्रत्ययप्रत्ययसम्बन्धिनोऽवर्णात् परस्य शतुर्नित्यं नुमागमो भवति इकारे ईपि च परे । ऋ पचन्ती पठन्ती इत्यादि ॥ ७ ॥

नदादेः ॥ ८ ॥

नदादेर्गणात् स्त्रियामीप् प्रत्ययो भवति । नदी गौरी गौतमी ॥ ८ ॥

इन्द्रादेरानीप् च ॥ ९ ॥

इन्द्रादेर्गणादानीप् प्रत्ययो भवति । इन्द्राणी भवानी शर्वाणी ॥ ९ ॥

ईप् समाहारे गुणश्च ॥ १० ॥

समाहारार्थे ईप् प्रत्ययो भवति गुणश्च । त्रयी पञ्चकुली ॥ १० ॥

पुंयोगे ॥ ११ ॥

आकारात् पुंयोगे स्त्रियाम् ईप्प्रत्ययो भवति । शूद्रस्य स्त्री शूद्री । गणकी ॥ ११ ॥

---

१ इन्द्रादेरित्यादि शब्दात् इन्द्र, ब्रह्मन्, रुद्र, भव, शर्व, मृड, हिम, अरण्य, यव, यवन, मातुलशब्दानां मानीप् प्रत्ययो भवति ॥

जातेरयोपधात् ॥ १२ ॥

जातिवाचिनोऽयकारोपधादकारान्तात् स्त्रियामीप्प्रत्ययो भवति । अस्त्रीविषयादिति वाच्यम् । तेन मक्षिका बलाका इत्यादौ ङीप् न । मेषी शूकरी हंसी कुक्कुटी ब्राह्मणी । अयकारोपधादिति किम् । क्षत्रिया वैश्या (प्रथमवयोवाचिनोऽतईप् वक्तव्यः । *) कुमारी किशोरी कलभी। प्रथमग्रहणात् किम्। वृद्धा स्थविरा । अद्ग्रहणात् किम् शिशुः ॥ १२ ॥

स्वाङ्गाद्वा ॥ १३ ॥

स्वाङ्गवाचिनो वा स्त्रियामीप् प्रत्ययो भवति । सुमुखी मृगाक्षी तन्वङ्गी । वाग्रहणात् पद्मवदना कमलवदना इत्यादौ न भवति ।

(कृदिकारादक्तेरीब् वा वक्तव्यः । *)

अङ्गुलिः अङ्गुली । धूलिं धूलीः । आजिः आजी अक्तेरिति विशेषणात् कृतिः भूतिः ॥ १३ ॥

एच मन्वादेः ॥ १४

मन्वादेर्गणात् स्त्रियामीप्प्रत्ययो भवति ऐकारादेशश्च । मनायी । चकारान्मनोरौ वां । मनावी वृषाकपायी । पक्षे मनोः स्त्री मनुः ॥ १४ ॥

---

१ आकृतिग्रहणाजातिर्लिङ्गानां च न सर्वभाक् ॥ सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह॥ २ अयोपधात् किम् क्षत्रिया । वैश्या॥ ३ स्वाङ्गं त्रिधा। अद्रवं मूर्तिमत्स्वाङ्गं प्राणिस्थमविकारजम् । अतत्स्थं तत्र दृष्टं च तेन चेत तत्तथायुतम् ॥ ४ आदिशब्देन अग्नेभार्या अग्नायी । पूताः क्रतवो यस्येति पूतक्रतुः । पूतक्रतोः स्त्री पूतक्रतायी ॥

पत्न्यादयः ॥ १५ ॥

पत्न्यादयः शब्दाः ईप्प्रत्ययान्ताः निपातात्साधवः। (समानैकवीरपिण्डपुत्रभ्रातृदासेभ्योबहुव्रीहौ पत्युर्नादेश ईप् च ॥) सपत्नी। एकपत्नी। वीरपत्नी। पत्नी अन्तर्वत्नी सखी अशिश्वी अर्द्धजरती युवती प्राची प्रतीची उदीची समीची। दारशब्दो नित्यं बहु वचनान्तः पुंल्लिङ्गः। दाराः दारान् दारैः दारेभ्यः २ दाराणाम् दारेषु हे दाराः॥१५॥

वोर्गुणात् ॥ १६ ॥

उकारान्ताद् गुणवाचिनो वा स्त्रियामीप् प्रत्ययो भवति। पट्वी-पटुः। मृद्वी—मृदुः। तन्वी—तनुः। ऋज्वी-ऋजुः ॥ १६ ॥

उतऊः ॥ १७ ॥

उकारान्तान्मनुष्यजातेः स्त्रियामूप्रत्ययो वा भवति। पङ्गूः पङ्गुः। वामोरूः—वामोरुः ॥ १७ ॥

यूनस्तिः ॥ १८ ॥

युवन्शब्दात् स्त्रियां तिप्रत्ययो भवति। युवतिः। एभ्यो नामत्वात् स्यादयः आबन्तादाप् "आप" इति सिलोपः ईबन्ताद्धसे परे सेर्लोपः। पूर्व्ववत् प्रक्रिया ॥ १८ ॥

इति स्त्रीप्रत्ययाः।

॥ अथ कारकाणि ॥

अथ विभक्त्यर्थो निरूप्यते ।

लिङ्गार्थे प्रथमा ॥ १ ॥

धातुप्रत्ययातिरिक्तमर्थवच्छब्दरूपं लिङ्गं तस्यैवार्थे सन्मात्रे प्रथमाविभक्तिर्भवति । लिङ्गादयोऽपि प्रथमार्था इति केचित् । तत्सद्ब्रह्म ॥ १ ॥

अन्योक्ते प्रथमा ॥ २ ॥

रविरिव राजते राजा । रोषात्कुमारी रोरूयते । बोभुज्यते भुव भूपालः । प्रागास्तां रामलक्ष्मणौ । यदा कर्ता प्रथमान्तः कर्म्मणि द्वितीया तदा । यदा कर्ता तृतीयान्तः कर्म्मणि प्रथमा तदा । मनसि वचासि कृत्ये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ॥ परगुणपरमाणून्पर्वतीकृत्य नित्यं निजगुणविकसन्तः सन्ति सन्तः कियन्तः ॥ कुमाराः शेरते स्वैरं रोरूयन्ते च नारकाः । जेगीयन्ते च गीतज्ञा मेम्रियन्ते रुजार्दिताः ॥ २ ॥

आमन्त्रणे च ॥ ३ ॥

आमन्त्रणमभिमुखीकरणं तस्मिन्नर्थे प्रथमा विभक्तिर्भवति। मांसमुद्धर गोविन्द प्रसीद परमेश्वर। कुमारौ स्वैरमासाथां क्षमध्वं भो तपस्विनः॥३॥

भोसः ॥ ४ ॥

भोस् भगोस् अघोस् एते शब्दा निपात्यन्ते धिविषये । क्षमस्व भो

---

१ क्रियासिद्ध्युपकारकं कारकम् । तच्च षड्विधम् ॥ कर्ता कर्म च करणं संप्रदानं तथैव च ॥ अपादानाधिकरणे चेत्याहुः कारकाणि षट् ॥

दुराराध्य भगोरतुभ्यं नमोस्तु ते । अधीष्व भो महाप्राज्ञ घातयाघोस्व-घस्मरम् ॥ ४ ॥ इति प्रथमा ॥ १ ॥

शेषाः कार्ये ॥ ५ ॥

कर्तृसाधनयोर्दानपात्रे विश्लेषावधौ सम्बन्धाऽऽधारभावयोः शेषा विभक्तयो द्वितीयाद्या एष्वर्थेषु भवन्ति ॥ कर्ता कर्म्म च करणं सम्प्रदानं तथैव च । अपादानाधिकरणमित्याऽहुः कारकाणि षट् ॥ कार्ये कर्मकारके उत्पाद्ये आप्ये संस्कार्य्ये विकार्ये च द्वितीया विभक्तिर्भवति । कटं करोति कारूको रूपं पश्यति चाक्षुषः । राज्यं प्राप्नोति धर्म्मिष्ठः सोमं सुनोति सोमपाः । अभिसर्व्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते । अभितो ग्रामं नदी वहति । सर्वतोग्रामं वनानि सन्ति । धिग् देवदत्तम् । उपर्य्युपरिग्रामं मेघाः पतन्ति । अधोऽधोग्रामं शलभाः पतन्ति । अध्यधि ग्रामं मृगाश्चरन्ति । समया निकषा हा प्रतियोगेऽपि । समया ग्रामम् । निकषा ग्रामम् । अनु ग्रामम् ५

कालाध्वनोर्नैरन्तर्येऽपि ॥ ६ ॥

कालाध्वनोर्नैरन्तर्ये द्वितीया विभक्तिर्भवति । मासमधीते । क्रोशं पर्वतः । नैरन्तर्याऽभावे मासस्य द्विरधीते । क्रोशस्यैकदेशे पर्वतः ॥ ६ ॥

इति द्वितीया ॥ २ ॥

कर्तरि प्रधाने क्रियाश्रये साधने च ॥ ७ ॥

क्रियासिद्ध्युपकारके करणेऽर्थे तृतीया विभक्तिर्भवति ॥ भिन्नः शरेण रामेण रावणो लोकरावणः । कराग्रेण विदीर्णोऽपि वानरैर्युद्ध्यते पुनः ७

इति तृतीया ॥ ३ ॥

दानपात्रे चतुर्थी ॥ ८ ॥

दानपात्रे सम्प्रदानकारके चतुर्थी भवति । सम्यक् श्रेयोबुद्ध्या प्रदीयते तत् सम्प्रदानं। ददाति दण्डं पुरुषो महीपतेर्न चातिभक्त्या न च दानकाम्यया । यद्दीयते दानतया सुपात्रे तत्संप्रदानं कथितं मुनीन्द्रैः ॥ वेदविदे गां ददाति । अन्यत्र राज्ञो दण्डं ददाति । रजकस्य वस्त्रं ददाति॥८॥

इति चतुर्थी ॥ ४ ॥

विश्लेषाऽवधौ पञ्चमी ॥ ९ ॥

विश्लेषो विभागस्तत्रयोऽवधिश्चलतयाज्वलतया वा विवक्षितस्तत्रापादाने पञ्चमी भवति । धावतोऽश्वादपतत् । भूभृतोऽवतराति गङ्गा ॥ ९ ॥

॥ इति पञ्चमी ॥ ५ ॥

सम्बन्धे षष्ठी ॥ १० ॥

सम्बन्धिनोर्मध्ये योऽप्रधानस्तत्र षष्ठी भवति । भेद्यभेदकयोः श्लिष्टः ससम्बन्धोऽन्यउच्यते । द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् । एकक्रियातः परस्परापेक्षारूपः सम्बन्धः । राज्ञः स पुरुषो ज्ञेयः पित्रोरेतत्प्रपूजनम् । गुरूणां वचनं पथ्यं कवीनां रसवद्वचः ॥ १० ॥

इति षष्ठी ॥ ६ ॥

आधारे सप्तमी ॥ ११ ॥

तदाधारोऽधिकरणं षड्विधम् । औपश्लेषिकम् १ । सामीप्यकम् २ ।

१ आध्रियन्ते क्रिया अस्मिन् इत्याधारः । मेघे वर्षति सति ॥

अभिव्यापकम् ३ । वैषयिकम् ४ । नैमिमित्तिकम् ५ । औपचारिकम् ६ । चेति । कटे शेते कुमारोऽसौ वटे गावः सुशेरते । तिलेषु विद्यते तैलं हृदि ब्रह्मामृतं परम् ॥ युद्धे सन्नह्यते धीरोऽङ्गुल्यग्रे करिणां शतम् । भूभृत्सु पादपाः संति गङ्गायां वरवालुकाः ॥ ११ ॥

भावे सप्तमी ॥ १२ ॥

प्रसिद्धक्रियाअप्रसिद्धक्रियाबोधनं भावस्तत्र सप्तमी भवति वर्षति देवे चौर आयातः । पतत्यंशुमालिनि पतितोऽरातिः । काले शरदि पुष्यति सप्तच्छदाः ॥ १२ ॥

अथोपपदविभक्त्यार्थो निरूप्यते ।

विना सह नमस् निर्द्धारण ऋते स्वाम्यादिभिश्च ॥ १३ ॥

एतैरपि योगे द्वितीयाद्या विभक्तयो भवन्ति । विना पापं सर्वं फलति । विना वातं विना वर्षं विद्युतः पतनं विना । विना हस्तिकृतं दोषं केनेमौ पतितौ द्रुमौ ॥ अन्तरेणाक्षिणी किं जीवितेन अन्तरा त्वा मां हरिरित्यादिपदात् ग्राह्यम् ॥ १३ ॥

सहादियोगे तृतीयाऽप्रधाने ॥ १४ ॥

सह सदृशं साकं सार्धं समं योगेपि तृतीया भवति । सहशिष्येणागतो गुरुः । सदृशश्चैत्रो मैत्रेण । साकं नयनाभ्यां श्लक्ष्णा दन्ताः । सार्धं धनिभिर्धृतः साधुः । समं चन्द्रेणोदितो गुरुः ॥ १४ ॥

नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगे चतुर्थी ॥ १५ ॥

एभिर्योगे चतुर्थी भवति नमो नारायणाय । स्वस्ति राज्ञे । सोमाय स्वाहा । पितृभ्यः स्वधा । अलं मल्लो मल्लाय । वषडिन्द्राय ॥ १५ ॥

ऋते आदियोगे पञ्चमी ॥ १६ ॥

ऋते ज्ञानान्न मुक्तिः । अन्यो गृहाद्विहारः । आराद्वनात् । इतरो ग्रामात् ॥ १६ ॥

ऋते योगे द्वितीया च ॥ १७ ॥

ज्ञानमृते । चकारादिना योगेपि तृतीयापञ्चम्यौ स्तः । ज्ञानेन विना । ज्ञानाद्विना ॥ १७ ॥

दिग्योगे पञ्चमी ॥ १८ ॥

पूर्वो ग्रीष्माद्वसन्तः ॥ १८ ॥

निर्द्धारणे षष्ठीसप्तम्यौ ॥ १९ ॥

निर्द्धारणं क्रियागुणजातिभिः समुदायात् पृथक्करणं तत्र षष्ठीसप्तम्यौ भवतः । क्रियापराणां भगवदाराधकः श्रेष्ठः क्रियापरेषु वा । गवां कृष्णा गौः संपन्नक्षीरा गोषु वा । एतेषां क्षत्रियः शूरतमः एतेषु वा ॥ १९ ॥

स्वाम्यादिभिश्च ॥ २० ॥

स्वाम्यादिभिर्योगे षष्ठीसप्तम्यौ भवतः । गवां स्वामी गोषु स्वामी गवामधिपतिः गोष्वधिपतिः ॥ २० ॥

---

१ ऋते, अन्यः, आरात् इतरः, अंचूत्तरपदं, दिग्वाचकशब्दः । आहि आच एते ऋत आदयः ॥

कर्तृकार्ययोरक्तादौ कृति षष्ठी ॥ २१ ॥

कर्तरि कार्ये च षष्ठी विभक्तिर्भवति क्तादिवर्जिते शब्दे प्रयुज्यमाने । व्यासस्य कृतिः । भारतस्य श्रवणम् ॥ २१ ॥

स्मरतौ च कार्ये ॥ २२ ॥

स्मरतौ धातौ प्रयुज्यमाने कर्मणि षष्ठी भवति । मातुः स्मरति । मातरं स्मरति । (हेतौ तृतीया पञ्चमी च वक्तव्या ॥ *) अनित्यः शब्दः कृतकत्वेन कृतकत्वाद्वा ॥ २२ ॥

भयहेतौ पञ्चमी ॥२३ ॥

चोराद्बिभेति । व्याघ्रात्त्रस्यति । विद्युत्पाताच्चकितः ॥ २३ ॥

[२]षष्ठी च हेतुप्रयोगे ॥ २४ ॥

हेतौ प्रयोगे हेतौ द्योत्ये च षष्ठी भवति । चकारात् सर्वादियोगे तृतीयापि । कस्य हेतोरियं कन्या । अन्यस्य हेतोर्वसाति ॥ २४ ॥

[३]इत्थम्भावे तृतीया ॥ २५ ॥

शिष्यं पुत्रेण पश्यति संसारमसारेण। पुष्करिणीं नद्या पश्यति॥२५॥

---

१ अत्र " उभयप्राप्तौ कर्मणि " । चित्रं गवां दोहोऽगोपेन अयमपि संग्रहः । २ अत्र हेतुशब्दसंबन्धेन चकारात् सर्वा विभक्तयो युज्यन्ते । केन हेतुना वसति । कस्य हेतोः । निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् को हेतुः । कं हेतुम् । केन हेतुना इत्यादि । ३ कंचित्प्रकारं प्राप्त इत्थंभावः ।

येनाङ्गविकारः ॥ २६ ॥

येनाङ्गेन विकृतेनाङ्गिनोऽङ्गविकारो लक्ष्यते तस्मादङ्गात्तृतीयाविभक्तिर्भवति । देवदत्तोऽक्ष्णा काणः । पादेन खञ्जः । कर्णेन बधिरः । शिरसा खल्वाटः ॥ २६ ॥

जनिकर्तुः प्रकृतीः ॥ २७ ॥

जायमानस्य कार्यस्योपादानमपादानसंज्ञं भवति । तत्रापादाने पञ्चमी । यस्मात्प्रजाः प्रजायन्ते तद्ब्रह्मेति विदुर्बुधाः ॥ २७ ॥

आङादियोगे ॥ २८ ॥

आङादियोगे पञ्चमीविभक्तिर्भवति । आ पाटलिपुत्राद्दृष्टो देवः ॥ २८ ॥

तादर्थ्ये चतुर्थी ॥ २९ ॥

संयमाय श्रुतं धत्ते नरो धर्माय संयमम् । धर्मं मोक्षाय मेधावी धनं दानाय मुक्तये ॥ २९ ॥

क्रुध्यादियोगे चतुर्थी ३० ॥

क्रुधाद्यर्थानां प्रयोगे यं प्रति कोपः सः संप्रदानसंज्ञको भवति । क्रूराय क्रुध्यति । मित्राय द्रुह्यति । गुणवते असूयति (क्यब्लोपे पञ्चमी वक्तव्या ॥ * ॥) हर्म्यात् प्रेक्षते । आसनात् प्रेक्षते । (निमित्तात्कर्मयोगे सप्तमी च वक्तव्या ॥ * ॥) चर्मणि द्वीपिनं हन्ति

---

१ तस्मै कार्यायेदं तादर्थ्यम् । २ क्रुधद्रुहेर्ष्यासूयार्थानां यंप्रति कोपः । एतेषां धातूनां प्रयोगे संप्रदानसंज्ञा भवति । ३ क्यबर्थो दृश्यते यत्र क्यबन्तं नैव दृश्यते । तदेव हि क्यब्लोपित्वं ज्ञातव्यं हि सदा बुधैः ।

दन्तयोर्हन्ति कुञ्जरम् । केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः ॥ ३० ॥

विषये च ॥ ३१ ॥

तर्के चतुरः ॥ ३१ ॥

षष्ठीसप्तम्यौ चानादरे ॥ ३२ ॥

बहूनां क्रोशतां गतश्चौरः । बहुष्वसाधुषु निवारयत्स्वपि स्वयमार्यो याति साधुमार्गेण । बहुषु साधुषु वसत्स्वपि स्वयमनार्यो यात्यसाधुमार्गेण । मातापित्रो रुदतोः प्रव्रजति पुत्रः ॥ ३२ ॥

अन्योक्ते प्रथमा ॥ ३३ ॥

यदिदं कार्यत्वादन्येनाख्यातेन कृता चोक्तं भवति तदा प्रथमा प्रयोक्तव्या । घटः क्रियते । पटः कार्य्यः ॥ ३३ ॥

छन्दसि स्यादिः सर्वत्र ॥ ३४ ॥

दध्ना जुहोति । पुनन्तु ब्रह्मणस्पतिः । व्रजतीर्विरेजुः ॥ ३४ ॥

॥ इति कारकप्रक्रिया समाप्ता ॥

अथार्थवद्विभक्तिविशिष्टानां पदानां समासो निरूप्यते ।

समासश्चान्वये नाम्नाम् ॥ १ ॥

नाम्नामन्वययोग्यत्वे सत्येव समासो भवति । चशब्दात्तद्धितेऽपि भवति । ततो भार्या पुरुषस्येत्यादौ न भवति परस्परमसंबन्धात् । स च

१ विषयो नामान्यत्रभावः ।

षड्विधः । अव्ययीभावस्तत्पुरुषो द्वन्द्वो बहुव्रीहिः कर्म्मधारयो द्विगुश्चेति । तत्र पूर्वपदप्रधानोऽव्ययीभावः । द्विगुतत्पुरुषौ परपदप्रधानौ । द्वन्द्वकर्मधारयौ चोभयपदप्रधानौ । बहुव्रीहिरन्यपदप्रधानः तस्य क्रियाभिः संबन्धात् उभयपदप्रधानो बलवान् । ऐकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्रयोजनम् । अधि स्त्री इति स्थिते स्त्रीशब्दाद्द्वितीयैकवचनम् । स्त्रियमधिकृत्य । भवति विग्रहे अन्वययोग्यार्थसमर्थकः पदसमुदायो विग्रहो वाक्यमिति यावत् । स्वपदैरन्यपदैर्वा विविच्य कथनं विग्रहः । कृते समासे अव्ययस्य पूर्वनिपातो वक्तव्यः ॥ * ॥ १ ॥

पूर्वेऽव्ययेऽव्ययीभावः ॥ २ ॥

अव्यये पूर्वपदे सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति ॥ २ ॥ इति समाससंज्ञायां सत्याम् ।

समासप्रत्यययोर्लुक् ॥ ३ ॥

समासे वर्तमानाया विभक्तेः प्रत्यये च परे लुग् भवति । इत्यमो-लुक् । निमित्ताभावे नैमित्तिकस्याप्यभावः । नामसंज्ञायां स्यादिर्विभक्तिः । अधिस्त्री सि इति स्थिते ॥ ३ ॥

---

१ अव्यस्य अव्ययेन भवनमव्ययीभावः । २ स एव आग्रिमः पुरुषः प्रधानं यस्यासौ तत्पुरुषः । ३ द्वन्द्वायते उभयपदार्थौ येनासौ द्वन्द्वः । ४ बहुसमासातिरिक्तं व्रीहिः प्रधानं यस्मिन्नसौ बहुव्रीहिः । ५ कर्मभेदकं धारयतीति कर्मधारयः । ६ द्वाभ्यां गच्छतीति द्विगुः ।

सनपुंसकम् ॥ ४ ॥

सोऽव्ययीभावः समासे नपुंसकलिङ्गो भवति । नपुंसकत्वाद्ध्रस्वत्वम् ॥ ४ ॥

अव्ययीभावात् ॥ ५ ॥

अव्ययीभावात्परस्याविभक्तेर्लुग् भवति । अधिस्त्रि गृहकार्यम् । रायमतिक्रान्तमातिरि कुलम् । नावमतिक्रान्तमतिनु जलम् (ह्रस्वादेशे सन्ध्यक्षराणामिकारोकारौ च वक्तव्यौ ॥ * ॥) योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । रूपस्य योग्यं अनुरूपम् । पदार्थान् व्याप्तुमिच्छा वीप्सा ॥ विष्णुं विष्णुं प्रति प्रतिविष्णु । सादृश्ये तु यथा हरिस्तथा हरः ॥ ५ ॥

यथाऽसादृश्ये ॥ ६ ॥

यथाशब्दः असादृश्ये वर्त्तमानः समस्यते सोऽव्ययीभावः समासो भवति । शक्तिमनतिक्रम्य करोतीति यथाशक्ति ॥ ६ ॥

अतोमनतः ॥ ७ ॥

अकारान्तादव्ययीभावात्परस्याविभक्तेरम् भवति । अतं वर्ज्जयित्वा कुम्भस्य समीपं उपकुम्भं वर्त्तते । उपकुम्भं पश्य । उपकुम्भादानय । अनत इति विशेषणात्पञ्चम्या अम् न भवति ॥ ७ ॥

---

१ स्त्री च पुमांश्च स्त्रीपुंसौ न स्त्री पुंसौ इति नपुंसकम् । स्त्रीपुंसशब्दस्य पुंसकभावः ।

वा टाङ्योः ॥ ८ ॥

टाङि इत्येतयोर्वा अम् भवति । उपकुम्भेन कृतं उपकुम्भकृतम् । उपकुम्भं निधेहि उपकुम्भे निधेहि उपकुम्भादानय ॥ ८ ॥

अवधारणार्थे यावति च ॥ ९ ॥

अवधारणार्थे यावच्छब्दे प्रयुज्यमानेऽव्ययपूर्वपदाभावेऽपि योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति । यावन्त्यमत्राणि संभवन्ति तावतो ब्राह्मणान्निमन्त्रयस्वेति यावदमत्रम् । मक्षिकाणामभावो निर्मक्षिकम् ॥ ९ ॥

॥ इत्यव्ययीभावः ॥

अमादौ तत्पुरुषः ॥ १ ॥

द्वितीयाद्यन्ते पूर्वपदे सति योऽन्वयः स तत्पुरुषसंज्ञकः समासो भवति । ग्रामं प्राप्तो ग्रामप्राप्तः । दात्रेण छिन्नं दात्रच्छिन्नम् । यूपाय दारु यूपदारु । वृकेभ्यो भयं वृकभयम् । राज्ञः पुरुषो राजपुरुषः । अक्षेषु शौण्डः अक्षशौण्डः ॥ क्वचिदमाद्यन्तस्य परत्वम् । आहिताग्निः पूर्वं भूतो भूतपूर्वः । समासे क्वचिदेकपद्यं णत्वहेतुः । शराणां वनं शर-

---

१ एतत् पञ्चम्या तृतीयासप्तम्योर्द्विवचनबहुवचनयोरप्युपलक्षणम्, तेन द्विवचनबहुवचनयोरपि वा अम् भवति न लुक् । पञ्चम्यास्तु अम्लुकोर्निषेधः । २ अनत इति विशेषणात् उपकुम्भादानय भवति । ३ कृतं भवता निर्मक्षिकमिति शाकुन्तले विदूषकेनोक्तम् । ४ अत्र भूतपूर्वेचरडिति निर्देशात भूतशब्दस्य पूर्वनिपातः ।

वणम् आम्राणां वनं आम्रवणम् (पानस्य वा *) सुरापानं सुरापाणम् ॥ १ ॥

नञि ॥ २ ॥

नञि पूर्वपदे सति योऽन्वयः स तत्पुरुषसंज्ञकः समासो भवति ॥२॥

नञ् ॥ ३ ॥

नञ् सुबन्तेन समस्यते । न ब्राह्मणः अब्राह्मणः समासे सति नञोऽकारादेशो भवति कादिवर्ज्यम् ॥ ३ ॥

नो ॥ ४ ॥

नाकः । नपुंसकम् ॥ ४ ॥

अन्स्वरे ॥ ५ ॥

समासे सति नञोऽनादेशो भवति स्वरे परे । अश्वादन्योऽनश्वः । धर्म्माद्विरुद्धोऽधर्म्मः । ग्रहणानामभावोऽग्रहणमित्यादि । तदन्यतद्विरुद्ध तदभावेषु नञ् वर्तते ॥ ५ ॥

इति तत्पुरुषः ।

---

१ आदिशब्देन नाक, नक्र, नग, तनूनपात, नख, नपुंसक, नक्षत्र, नकुल, नासत्य, नमुचि नर इत्यादि । अथच । नागर, नासिका, नमेरु, ननाघ्रि, नभसि, नान्तरीय, नग, नद, नयाद, नदेव, नापित, नघुष इत्यपि केनाचित् गणिताः । उभयथापि नाकादौ न भवन्ति ।

चार्थे द्वन्द्वः ॥ १ ॥

समुच्चयाऽन्वाचयेतरेतरयोगसमाहाराश्चार्थाः तेषु चार्थेषु द्वन्द्वः समासो भवति । तत्रेश्वरं गुरुं च भजस्वेति प्रत्येकमेकक्रियाऽभिसंबन्धे समुच्चये समासो नास्ति । बटो भिक्षामट गां चानयेति क्रमेण क्रियाद्वयसंबन्धे । अन्वाचये च समासो नास्ति परस्परमसबन्धात् ॥ इतरेतरयोगे समाहारे चार्थे द्वन्द्वः समासो भवति (द्वन्द्वेऽल्पस्वरप्रधाने इकारोकारान्तानां पूर्वनिपातो वक्तव्यः ॥ * ॥ अग्निश्च मारुतश्च अग्निमारुतौ । पटुश्च गुप्तश्च पटुगुप्तौ ॥ १ ॥

उक्तार्थानामप्रयोगः ।

स्त्री च पुरुषश्च स्त्रीपुरुषौ । भोक्ता च भोग्यश्च भोक्तृभोग्यौ । धवश्च खदिरश्च धवखादिरौ । (देवताद्वन्द्वे पूर्वपदस्य दीर्घो वक्तव्यः।*।) अग्निश्च सोमश्च अग्नीषोमौ । इन्द्रश्च बृहस्पतिश्च इन्द्राबृहस्पती । (अग्न्यादेः सोमादीनां षत्वं वक्तव्यम् * इतरेतरयोगे द्विवचनम् । अग्नीषोमौ (एकवद्भावो वा समाहारे वक्तव्यः । *) शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशाः । तेषां समाहारे शशकुशपलाशम् ॥

सनपुंसकम् ॥ २ ॥

---

१ अनेके एकस्मिन् समुच्चीयन्ते इति समुच्चयः । २ क्रमेण क्रियाद्वय-संबन्धोऽन्वाचयः । परस्परस्य निरपेक्षस्यानेकस्य क्रियाद्वयेऽन्वयोऽन्वाचयः । ३ मिलितयोर्मिलितानां वै क्रियान्वय इतरेतरयोगः । ४ संहतिः समाहारः । ५ द्वौद्वौ अर्थौ अभिदधात्येकोऽस्मिन्निति द्वन्द्वः ।

यस्यैकवद्भावः स नपुंसकं भवति (अन्यादीनां विभक्तिलोपे कृते पूर्वस्य समागमो वक्तव्यः । *) अन्यश्च अन्यश्च अन्योन्यम् । परश्च परश्च परस्परम् ॥ २ ॥

॥ इति द्वन्द्वः ॥

एकत्वे द्विगुद्वन्द्वौ ॥ १ ॥

एकत्वे वर्तमानौ द्विगुद्वन्द्वौ नपुंसकलिङ्गौ भवतः । पाणिपादम् । मार्दङ्गिकपाणविकम् । रथिकाश्वारोहम् । बदरामलकम् ॥ १ ॥

संख्यापूर्वो द्विगुः ॥ २ ॥

संख्यापूर्वः समासो द्विगुर्निगद्यते । पंचसु कपालेषु संस्कृतः पुरोडाशः पंचकपालः ॥ २ ॥

समाहारेऽत ईप् द्विगुः ॥ ३ ॥

समाहारेऽर्थे द्विगुः समासो भवति ततोऽकारान्तादीप् प्रत्ययो भवति । दशानां ग्रामाणां समाहारो दशग्रामी । आकारान्तो द्विगुः स्त्रियां भाष्यते ॥ पञ्चाग्नयः समाहृता इति पञ्चाऽग्नि । पञ्चानां गवां समाहारः पञ्चगु । नपुंसकत्वाद्ध्रस्वत्वम् । त्रिफलेति रूढिः । (पात्रादीनामीप्प्रतिषेधो वक्तव्यः ॥ *) ॥ ३ ॥

॥ इति द्विगुः ॥

---

१ यथा पञ्चानां पात्राणां समाहारः पञ्चपात्रम् । चतुर्णां युगानां समाहारः चतुर्युगम् । त्रयाणां भुवनानां समाहारः त्रिभुवनम् इत्यादि ।

बहुव्रीहिरन्यार्थे ॥ १ ॥

अन्यपदार्थे प्रधाने यः समासः स बहुव्रीहिसंज्ञकः समासो भवति। बहु धनं यस्य स बहुधनः। अस्ति धनं यस्य स अस्तिधनः। यस्य प्रधानस्यैकदेशे विशेषणतया यत्प्रतिज्ञायते स तद्गुणसंविज्ञानो बहुव्रीहिः। यथा लम्बौ कर्णौ यस्य सः लम्बकर्णः। (बहुव्रीहौ विशेषणसप्तम्यन्तयोः पूर्वनिपातो वक्तव्यः ॥ *) कण्ठे कालो यस्यासौ कण्ठेकालः। करे धनं यस्य स करधनः ॥ १ ॥

नेन्द्वादिभ्यः ॥ २ ॥

सप्तम्यन्तस्य पूर्वनिपातो न भवति ॥ इन्दुशेखरः। चक्रपाणिः। पद्मनाभः। कपिध्वजः ॥ २ ॥

प्रजामेधयोरसुक् ॥ ३ ॥

सुप्रजाः दुर्मेधाः अत्वसोः सौ ॥ ३ ॥

धर्मादन् ॥ ४ ॥

सुधर्मा ॥ ४ ॥

अन्यार्थे ॥ ५ ॥

स्त्रीलिङ्गस्यान्यार्थे वर्त्तमानस्य ह्रस्वो भवति ॥ ५ ॥

पुंवद्वा ॥ ६ ॥

---

१ समस्यमानपदेतरपदार्थे समस्यमानपदानामन्वयो बहुव्रीहिरित्यर्थः।
२ सुष्ठु धर्मो यस्य सः सुधर्मा।

समासे सति समानाधिकरणे पूर्वस्य स्त्रीशब्दस्य पुंवद्भावो वा भवति । पुंवद्भावादीपो निवृत्तिः । रूपवती भार्या यस्य स रूपवद्भार्यः । वाग्रहणात् कल्याणीप्रिय इत्यादौ न भवति ॥ ६ ॥

गोः ॥ ७ ॥

गोशब्दस्यान्यार्थे[1] वर्त्तमानस्य ह्रस्वो भवति ॥ पञ्च गावो यस्य स पञ्चगुः । (संख्यासु व्याघ्रादिपूर्वस्य पादशब्दस्यालोपो वक्तव्यः ॥ *) सहस्रं पादा यस्य स सहस्रपात् । शोभनौ पादौ यस्य स सुपात् । व्याघ्रस्य पादाविव पादौ यस्य स व्याघ्रपात् । द्वौ पादौ यस्य स द्विपात् । द्विपादौ द्विपादः । द्विपादम् द्विपादौ (शसादौ स्वरे परे पदादेशश्च वक्तव्यः ॥ *) द्विपदः द्विपदा द्विपाद्भ्याम् द्विपाद्भिः इत्यादि ॥ ७ ॥

टाडकाः ॥ ८ ॥

समासे सति ट अ ड क इत्येते प्रत्यया भवन्ति । 'टकारस्तत्पुरुषे च अकारो द्वन्द्व एव च॥डकारश्च बहुव्रीहिः ककारोऽनियमो मतः' ॥८॥

नोवा ॥ ९ ॥

नान्तस्य पदस्य टेर्लोपो वा भवति यकारे स्वरे परे । वाग्रहणात् क्वचिन्न भवति उपधालोपश्च । अह्नो मध्यं मध्याह्नः । कवीनां राजा कविराजः । टकारोऽनुबन्ध ईबर्थः । कविराज्ञी । राज्ञां पूः राजपुरम् । वाक् च मनश्च वाङ्मनसम् । दक्षिणस्यां दिशि पन्थाः दक्षिणापथः ।

---

१ अन्यार्थे किम् । अतिशयितो गौः अतिगौः ।

अहश्च रात्रिश्च अहोरात्रम् । द्वौ च त्रयश्च परिमाणं येषां ते द्वित्राः । पञ्च च षट् च परिमाणं येषां ते पञ्चषाः । बहवो राजानो यस्यां नगर्यां सा बहुराजा नगरी । अत्र टिलोपे कृते "आबतः स्त्रियाम्" इत्याप् । बहवः कर्त्तारो यस्य स बहुकर्तृकः ॥ ९ ॥

कर्मधारयस्तुल्यार्थे ॥ १० ॥

पदद्वये तुल्यार्थे एकार्थनिष्ठत्वे सति कर्म्मधारयः समासो भवति । नीलं च तदुत्पलं च नीलोत्पलम् । रक्ता चासौ लता च रक्तलता । पुमांश्चासौ कोकिलश्चेति पुंस्कोकिलः (पुंसः खपे संयोगान्तलोपो वक्तव्यः) ॥ १० ॥

नाम्नश्च कृता समासः ॥ ११ ॥

प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन समासस्तत्पुरुषो भवति । प्रकृष्टो वादः प्रवादः । कुम्भं करोतीति कुम्भकारः ॥ ११ ॥

सहादेः सादिः ॥ १२ ॥

समासे सति सहादीनां सादिर्भवति । पुत्रेण सह वर्त्तत इति सपुत्रः । सहसन्तिरसां सध्रिसमितिरयः । सह अञ्चतीति सध्र्यङ् । सम् अञ्चतीति सम्यङ् । तिरः अञ्चतीति तिर्य्यङ् ॥ १२ ॥

कोः कदादिः ॥ १३ ॥

कुशब्दस्य कुत्सिते ईषदर्थयोस्तत्पुरुषे कत् कव का आदेशा भवन्ति । कुत्सितं अन्नं कदन्नम् । ईषदर्थे । ईषदुष्णं कवोष्णम् ।

(कोर्म्मदादेशश्च ।) मन्दोष्णं ॥ (रथवदयोश्च) कद्रथः । कद्वदः ॥ १३ ॥

पुरुषे वा ॥ १४ ॥

पुरुषशब्दे परे कुशब्दस्य वा कादेशो भवति तत्पुरुषे ॥ कुपुरुषः कापुरुषः ॥ १४ ॥

पथ्यक्षयोः ॥ १५ ॥

कोः कादेशः स्यात् । कुपथः कापथः । कुअक्षः काक्षः ॥ १५ ॥

ईषदर्थे च ॥ १६ ॥

ईषज्जलं काजलम् । षड्भिरधिका दश षोडश । षट् दन्ता यस्य षोडन् । षट् दन्त इति स्थिते । दन्तस्य दतृ । ऋ इत् षस्य दत्वं दस्य डः वृतो नम् । षोडन् । षट् प्रकाराः षोढा । संख्यायाः प्रकारे धा धस्य ढः (षषडत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च भवतीति वक्तव्यम् ॥ *) बृहच्छब्दस्य सुडागमे तलोपश्च । बृहतां पतिःबृहस्पति १६

महच्छब्दस्य टेराकारः समानाधिकरणे ॥ १७ ॥

महादेवः महेश्वरः । द्यौश्च भूमिश्च द्यावाभूमी । द्यौशब्दस्य द्यावादेशः । जायायाः जम्भावो दम्भावो निपात्यते । दम्पती जम्पती । क्वचिज्जायापती । आकृतीगणोयम् ॥ १७ ॥

---

१ विभाषा पुरुषे कास्यान्नियमेन हसे परे । अचित्तिरथवेदकोः कत्काक्षे वा पुरुषे पथि ॥ २ ईषदर्थे च वाच्ये स्युरम्रावुष्णे काकत्कवाः । एकविभक्त्यन्तानामेकार्थनिष्ठत्वं समानाधिकरणत्वम् ।

अलुक् क्वचित् ॥ १८ ॥

क्वचित्समासे कृदन्ते तद्धितेऽपि विभक्तेरलुग् भवति । कृच्छ्रान्मुक्तः । अप्सु योनिरस्येत्यप्सुयोनिः । उरसि लोम यस्यासौ उरसिलोमा । हृदि स्पृशतीति हृदिस्पृक् । कण्ठे कालो यस्यासौ कण्ठेकालः । वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः । वनेचरः । खेचरः । (समानाधिकरणे शाकपार्थिवादीनां मध्यमपदलोपो वक्तव्यः ॥ *) शाकः प्रियः यस्य सः शाकप्रियः शाकप्रियश्चासौ पार्थिवश्च शाकपार्थिवः ॥ १८ ॥

आदेश्च द्वन्द्वे ॥ १९ ॥

द्वन्द्वे समासे पूर्वपदस्य लोपो भवति॥चकारग्रहणात् विकल्पेन । माता च पिता च पितरौ । शिष्यमाणो लुप्यमानार्थाभिधायी । श्वश्रूश्च श्वशुरश्च श्वशुरौ । दुहिता च पुत्रश्च पुत्रौ ॥ १९ ॥

ऋतां द्वन्द्वे ॥ २० ॥

द्वन्द्वे समासे पूर्वपदस्य ऋकारस्य वा आकारो भवति माता च पिता च मातापितरौ ॥ २० ॥

द्वन्द्वे सर्वादित्वं वा ॥ २१ ॥

द्वन्द्वे समासे सर्व्वादित्वं वा भवति ॥ वर्णाश्च आश्रमाश्च इतरे च वर्णाश्रमेतरे वर्णाश्रमेतराः। (वैयधिकरणे बहुव्रीहौ मध्यमपदलोपोवक्तव्यः ॥ *) कुमुदस्य गन्ध इव गन्धो यस्य सः कुमुदगन्धिः ॥ २१ ॥

उपमानाच्च ॥ २२ ॥

उपमानात्परस्य गन्धशब्दस्याकारो भवति । हंसस्य गमनमिव गमनं यस्याः सा हंसगमना ॥ २२ ॥

दिक् संङ्ख्ये संज्ञायाम् ॥ २३ ॥

दिग्वाच्यसङ्ख्यावाचकशब्दौ संज्ञायां विषये परपदतुल्यार्थे समस्येते । स समासस्तत्पुरुषो भवति ॥ स्वपदविग्रहो नित्यसमासः अन्यस्त्वस्वपद विग्रहोपि ॥ दक्षिणाग्निः सप्तग्रामः ॥ २३ ॥

॥ इति समासप्रक्रिया ॥

अथ तंद्धितो निरूप्यते ॥

अपत्येऽण् ॥ १ ॥

नाम्नोऽपत्येऽर्थे अण् प्रत्ययो भवति ॥ उपगोरपत्यमिति वाक्ये उपगो अण् इति स्थिते समासप्रत्यययोरिति षष्ठीलोपः । णकारो वृद्ध्यर्थः ॥ १ ॥

आदिस्वरस्य ञ्णिति च वृद्धिः ॥ २ ॥

स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिर्भवति णिति तद्धिते परतः । उकारस्य औकारो वृद्धिः ॥ २ ॥

वोऽव्यस्वरे ॥ ३ ॥

---

१ जातित्वादेवैकवचनम् ।

उकारस्यौकारस्य च अव् भवति यकारे स्वरे औपगवः वासिष्ठः गौतमः (शिवादिभ्यश्चेति वक्तव्यः ।) शैवः वैदेहः ॥ ३ ॥

ऋउरणि ॥ ४ ॥

मातृशब्दस्य ऋकारस्य उर् भवति अणि परे ॥ ४ ॥

षषो णो मातरि ॥ ५ ॥

षाण्मातुरः । द्वयोर्मात्रोरपत्यं द्वैमातुरः ॥ ५ ॥

अत इञनृषेः ॥ ६ ॥

अकारान्तात् नाम्नोऽनृषिशब्दादपत्येऽर्थे इञ् प्रत्ययो भवति । यस्य लोपः । देवदत्तस्यापत्यं दैवदत्तिः । श्रीधरस्यापत्यं श्रैधरिः । दशरथस्यापत्यं दाशरथिः । पुरन्दरस्यापत्यं पौरन्दरिः ॥ ६ ॥

बह्वादिभ्यश्च ॥ ७ ॥

बह्वादिभ्यश्च इञ् प्रत्ययो भवति अपत्येऽर्थे । औपगविः । कार्ष्णिः । औडुलोमिः । आग्निशर्मिः ॥ ७ ॥

ण्यायनणेयण्णया गर्गनडा त्रिस्त्रीपितृष्वस्रादेश्च ॥ ८ ॥

गर्गादेर्नडादेस्त्र्यादेः स्त्रीलिङ्गात् पितृष्वस्रादेश्च ण्य आयन् अण् एयण् णीय इत्येते प्रत्यया यथासंख्येन भवन्ति अपत्येऽर्थे । गर्गस्यापत्यं गार्ग्यः । वत्सस्यापत्यं वात्स्यः । नडस्यापत्यं नाडायणः । चरस्या-

---

१ (व्यासवरुडानिषादचाण्डालबिम्बानां चेति वक्तव्यम्) व्यासस्य अपत्यं पुमान् वैयासकिः इत्यादि ॥

पत्यं चारायणः । अत्रेरपत्यं आत्रेयः । गाङ्गेयः । मह्या अपत्यं माहेयः। कपेरपत्यं कापेयः । पैतृष्वस्रीयः ॥ ८ ॥

अलुक् क्वचित् ॥

अमुष्य अपत्यं आमुष्यायणः । (मातृपितृभ्यां स्वसुः सस्य षत्वं वक्तव्यम् ॥ *) मातृष्वस्रीयः ॥ ९ ॥

पितृमातृभ्यां व्यड्डुलौ ॥ १० ॥

पितुर्भ्राता पितृव्यः । मातुर्भ्राता मातुलः ॥ १०

पितुर्डामहन् ॥ ११ ॥

पितुः पिता पितामहः । पितुर्माता पितामही ॥ ११ ॥

लुग्बहुत्वे क्वचित् ॥ १२ ॥

अपत्येर्थे उत्पन्नस्य प्रत्ययस्य बहुत्वे सति क्वचिदृष्यनृषिविषये लुग् भवति । गर्गाः, वासिष्ठाः, अत्रेयाः, विदेहाः, ॥ १२ ॥

देवतेदमर्थे ॥ १३ ॥

देवतार्थे इदमर्थे चोक्ताः प्रत्यया भवन्ति । इन्द्रो देवता अस्येति ऐन्द्रं हविः । सोमो देवता अस्येति सौम्यम् । देवदत्तस्य इदं दैवदत्तं वस्त्रम् ॥ १३ ॥

क्वचिद्द्वयोः ॥ १४ ॥

पूर्वपदोत्तरपदाद्योः कचिद्वृद्धिर्भवति । अग्निमरुतौ देवतेस्येति आग्निमारुतं कर्म । सुहृदो भावः सौहार्दम् ॥ १४ ॥ (अत्र भावे अण् वक्तव्यः ॥ *)॥

णितो वा ॥ १५ ॥

उक्तावक्ष्यमाणाश्च प्रत्यया विषयान्तरे णितो वा भवन्ति । अजो गौर्यस्य स अजगुस्तस्येदं धनुः आजगवम् अजगवम् वा । कुमुदस्य गन्ध इव गन्धो यस्य सः कुमुदगन्धिः तस्यापत्यं स्त्री कौमुदगन्ध्या । श्वशुरस्यायं श्वाशुर्यो ग्रामः । विष्णोरिदं वैष्णवम् । गोरिदं गव्यम् ॥ कुलस्य इदं कुल्यम् ॥ १५ ॥

त्वन्मदेकत्वे ॥ १६ ॥

तव इदं त्वदीयम् । मम इदं मदीयम् ॥ १६ ॥

चतुरश्चलोपः ॥ १७ ॥

चतुर्शब्दस्य चकारस्य लोपो भवति य्यणियोः परतः । तुर्य्यः तुरीयः ॥ १७ ॥

अन्यस्यदक् ॥ १८ ॥

अन्यशब्दस्य दगागमो भवति णीयप्रत्यये परे ॥ अन्यस्य इदं अन्यदीयम् । अर्द्धजरत्या इदम् अर्द्धजरतीयम् ॥ १८ ॥

कारकात् क्रियायुक्ते ॥ १९ ॥

कारकादप्येते प्रत्यया भवन्ति क्रियायुक्ते कर्तरि कर्म्मणि चाभिधेये । कुंकुमेन रक्तं वस्त्रं कौंकुमम् । मथुरायाः आगतो माथुरः। ग्रामे भवः ग्राम्यः । धुरं वहतीति धुर्यः धौरेयः ॥ १९ ॥

केनेयेकाः ॥ २० ॥

क, इन, इय, इक इत्येते प्रत्यया भवन्ति भवाद्यर्थेषु । णित्वम् चैषां वैकाल्पिकम् । कर्णाटे भवः कार्णाटकः कर्णाटको वा । ग्रामादागतस्तत्र जातो वा ग्रामीणः ग्राम्यः । सध्रीचि भवः सध्रीचीनः समीचि भवः समीचिनः । तिरश्चि भवः तिरश्चीनः ॥ २० ॥

यलोपश्च ॥ २१ ॥

कन्यादीनामन्त्ययकारलोपो भवति यकारे स्वरे परे । कन्यायाः जातः कानीनः । (नक्षत्रादण् वक्तव्यः ॥ *) पुष्येण युक्ता पौर्णमासी पौषी । पौष्यां भवः पौषीणः ॥ २१ ॥

इयो वा ॥ २२ ॥

क्षत्त्रशब्दाद्वा इय प्रत्ययो भवति । क्षतात् त्रायत इति क्षत्त्रं क्षत्त्रे भवः क्षत्त्रियः क्षात्त्रः । शुक्राज्जातम् शुक्रियम् । इन्द्राज्जातम् इन्द्रियम् । अक्षैर्दीव्यतीति आक्षिकः । शब्दं करोतीति शाब्दिकः । तर्कं करोतीति तार्किकः । वेदे जाता वैदिकी स्तुतिः ऋग्वा ॥ २२ ॥

किमादेस्त्यतनौ ॥ २३ ॥

---

१ क्षतात् किल त्रायत इत्युदग्रः क्षत्त्रस्य शब्दो भुवनेषु रूढः ॥

२ क्षात्त्रो धर्म इवाश्रितः ॥

किमादेरव्याद्देर्भवाद्यर्थेषु त्यतनौ प्रत्ययौ भवतः। कुत्र भवः कुत्रत्यः। कुतस्त्यः। ततस्त्यः। अद्य भवः अद्यतनः। ह्यो भवः ह्यस्तनः। श्वो भवः श्वस्तनः। सदा भवः सदातनः। (दक्षिणापश्चात्पुरसस्त्यण् वक्तव्यः॥ *) दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः॥ २३॥

स्वार्थेपि॥ २४॥

उक्ताः प्रत्ययाः स्वार्थेपि भवन्ति। देवदत्त एव दैवदत्तकः। चत्वार एव वर्णाः चातुर्वर्ण्यम्। चोर एव चौरः। भागरूपनामभ्यो धेयः स्वार्थेपि। भागधेयः रूपधेयः नामधेयः॥ २४॥

अणिनयोर्युष्मदस्मदोस्तवकादिः॥ २५॥

अणिनयोः प्रत्यययोः परतो युष्मदस्मदोस्तवकादय आदेशा भवन्ति। तव इदं तावकम्। मम इदं मामकम्। तावकीनः। मामकीनः। यौष्माकः। आस्माकः। यौष्माकीणः। आस्माकीनः॥ २५॥

वत्तुल्ये॥ २६॥

तुल्ये सादृश्येऽर्थे वत् प्रत्ययो भवति। चन्द्रेण तुल्यं चन्द्रवत् मुखम्। घटेन तुल्यं घटवत् उदरम्। पटवत् कम्बलम्॥ २६॥

भावे तत्वयणः॥ २७॥

शब्दस्य प्रवृत्तिनिमित्तं भावस्तस्मिन् भावे त, त्व, यण् इत्येते प्रत्यया भवन्ति। ब्राह्मणस्य भावो ब्राह्मणता। त्वयणौ नपुंसकलिङ्गौ भवतः।

ब्राह्मणत्वम् ब्राह्मण्यम् । सुमनसोभावः सौमनस्यम् । सुभगस्य भावः सौभाग्यम् । विदुषो भावः वैदुष्यम् ॥ २७ ॥

समाहारे ता च त्रैर्गुणश्च ॥ २८ ॥

त्रयाणां समाहारः त्रेता । जनानां समूहो जनता । देवता । (कर्मण्यपि यण् वक्तव्यः ॥ *) ब्राह्मणस्य कर्म्म ब्राह्मण्यम् । राज्ञः इदं कर्म राजन्यम् ॥ २८ ॥

लोहितादेरिमन् ॥ २९ ॥

लोहितादेर्भावेऽर्थे इमन् प्रत्ययो भवति स च डित् । डित्त्वाट्टिलोपः । लोहितिमा । अणोर्भावः अणिमा । लघोर्भावो लघिमा । महतो भावो महिमा ॥ २९ ॥

ऋ र इमनि ॥ ३० ॥

ऋकारस्य रेफो भवति इमनि परे । प्रथिमा । द्रढिमा । बहोर्भाव इति विग्रहे ॥ ३० ॥

बहोरिर्लोपो भू च बहोः ॥ ३१ ॥

बहोरुत्तरेषामिमनादीनामिकारस्य लोपो भवति । बहोः स्थाने भूचादेशः । बहोर्भावो भूमा ॥ ३१ ॥

अस्त्यर्थे मतुः ॥ ३२ ॥

नाम्नो मतुप्रत्ययो भवति अस्यास्मिन्नस्तीत्येतस्मिन्नर्थे । उकारो नुम्विधानार्थः । वृतो नुम् । गोमान् । श्रीमान् । गोमती । श्रीमती । आयुष्मान् ॥ ३२ ॥

जङ्कौ मत्वर्थे ॥ ३३ ॥

मत्वर्थे अङ्कौ प्रत्ययौ भवतः । वैजयन्ती पताका अस्य अस्मिन् वा वैजयन्तः प्रासादः । माया विद्यते अस्यास्मिन्वा मायिकः ॥ ३३ ॥

मान्तोपधाद्धत्विनौ ॥ ३४ ॥

मकारान्तान्मकारोपधादकारोपधाच्च वत्विनौ प्रत्ययौ भवतः अस्त्यर्थे । किंवान् लक्ष्मीवान् भगवान् । धनी दण्डी छत्री । दृषद्वती भूमिः । शमी कामी ॥ ३४ ॥

तडिदादिभ्यश्च ॥ ३५ ॥

तडिदादिभ्यः शब्देभ्यो वतुप्प्रत्ययो भवति । तडित्वान् विद्युत्वान् मरुत्वान् ॥ ३५ ॥

एतत्कियत्तद्भ्यः परिमाणे वतुः ॥ ३६ ॥

एतत्कियत्तद्भ्यः शब्देभ्यः परिमाणेऽर्थे वतुप्रत्ययो भवति ॥ ३६ ॥

यत्तदोरा ॥ ३७ ॥

यत्तदोष्टेरात्वं भवति वतो परे ॥ ३७ ॥

किमः किर्यश्च ॥ ३८ ॥

किम्शब्दस्य किरादेशो भवति वतौ परे । चकारान्मस्य वकारस्य यकारो भवति । कियान् ॥ ३८ ॥

आङ्श्चेतदो वा ॥ ३९ ॥